ॐ अर्हम् नमः ।

श्रीआत्मवल्लभग्रन्थाङ्क नं [११]

न्यायाम्भोनिधिश्रीमद्विजयानन्दसूरीन्द्रपरमगुरुपादपद्मेभ्यो नमः ।

श्रीभावदेवसूरिविरचिता–

# कथाचतुष्टयी ।

सम्पादकः–संशोधकश्च–

परमपूज्यन्यायाम्भोनिधिश्रीमद्विजयानन्दसूरीन्द्र–पट्टावतंसक–श्रीमद्विजयवल्लभसूरि–शिष्यावतंसक–
तपोनिधिश्री–विवेकविजय–विनेय–पंन्यासउमङ्गविजयो गणी ।

प्रकाशकः—श्रेष्ठिवर्य–क्षेमचन्द्रात्मजः षुष्पचन्द्रः बालापुर(वलाद) वास्तव्यः ।

वीरनिर्वाणम् २४६२ आत्मसंवत् ४० [ प्रतीनां पञ्चशती ] विक्रमसंवत् १९९२ ईस्वीसन् १९३६

[ मूल्यम् अष्टाणकाः ]

શ્રી મોહનલાલજી
જૈન જ્ઞાન ભંડાર
ગોપીપુરા સુરત.

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

इदं पुस्तकं श्रीशारदामुद्रणालये तदधिपतिना
**श्रावकहर्षचंद्रात्मजेन पण्डितभगवानदासेन मुद्रितम्.**
**अमदावाद-जैनसोसाइटी नं० १५.**

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

# यत्किञ्चिन्निवेदनम् ।

पूज्यपादैः श्रीमत्कालिकाचार्यसन्तानीयैः श्रीमद्भावदेवसूरिपुङ्गवैर्विनिर्मितं पद्यात्मकं महाकाव्यतया श्रीमत्पार्श्वनाथचरित्रं वरीवर्त्ति । तन्निर्माणकालस्तु—"श्रीपत्तनाऽऽख्यनगरे रविविश्व(१३१२)वर्षे श्रीपार्श्वप्रभोश्चरितरत्नमिदं ततान" इत्युल्लेखतः स्पष्टतयैवाऽवसीयते । अतश्चरित्रकवितॄणां भावदेवसूरिवराणां सत्तासमयोऽपि त्रयोदश–चतुर्दशशताब्दीमध्यकालः स्पष्ट एव ज्ञायते । इयं कथाचतुष्टयी उक्तचरित्रान्तर्गताऽस्ति । अतीवरसिकतया तन्मध्यान्निष्कास्य पृथक्तया मुद्रयित्वा प्रकाशमानीता । अस्यां कथाचतुष्टयां विनय–विवेक–सुसङ्ग–सत्त्वानां चतुर्णां गुणानामुपरि चतस्रः कथा रचिताः सन्ति । इमे च गुणा लौकिकशास्त्रेऽपि श्लाघ्या लोकोत्तरे तु अलम् । एते च लौकिका एव गुणाः सर्वज्ञोक्तमार्गेण नीता लोकोत्तराः स्युः । तथाहि—

विनयः—सुव्रताराधके सद्धर्मदेशके गुरौ शुश्रुषा, प्रणतिः, आज्ञापालनं, मृदुजल्पनमित्यादि ।

विवेकः—वीतरागदेवाधिदेवपूजनादौ मनोवाक्कायशुद्धकरणम् ।

सुसङ्गस्तु—यो धर्माख्यतृतीयमित्रेण साकं सङ्गमः ।

सुसत्त्वश्च—जिनदेवगदिताखिलतत्त्वेषु श्रद्धानविनिश्चयः ।

एवं लोकोत्तरगुणैर्लोकोत्तरं सुखं भवेदिति जिनधर्मरथारूढमानवैर्मुक्तिं यियासुभिः हया इव चत्वारो विनयादिगुणा अपि योजनीयाः ।

इति निवेदयते—

पंन्यास उमङ्गविजयो गणी ।

श्री भोहनला... जैन ज्ञान...

P. P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

आ॰ श्री॰ नं॰ ९९७
आ॰ ओ॰ नं॰ ६७०, ग्रं॰ ३३२१
प्र॰ नं॰ ३७०
ह॰ पो॰ नं॰ १०३१ / १२८३२
श्री मोहनलालजी जैन ज्ञान भंडार गोपीपुरा, सुरत.

आत्मवल्लभग्रन्थाङ्क नं. [११]

अर्हम् ।

श्रीमद्विजयवल्लभसूरिगुरुपादपद्मेभ्यो नमः ।

श्रीभावदेवसूरिविरचिता

विनय-विवेक-सुसङ्ग-सत्त्वोपरि—

# कथाचतुष्टयी ।

तं नमामि जिनं वीरं, यदुत्था त्रिपदी नदी । क्ष्माधरगुरुं प्राप्य, विश्वं व्यापाऽस्तकल्मषा ॥१॥ नमोऽस्तु गुरुचन्द्राय, यत्करस्पृष्टमूर्धनि । आविर्भवति भव्येऽश्मन्यपि वाक्यसुधारसः ॥२॥ गुरूणां विनतैर्भाव्यं, कर्त्तव्या साधुसङ्गतिः । सविवेकं मनो धार्यं, न त्याज्यं सत्त्वमुत्तमम् ॥३॥ विनयश्च विवेकश्च, सुसङ्गश्च सुसत्त्वता । लौकिका अप्यमी श्लाघ्या, गुणा लोकोत्तरास्त्वलम् ॥४॥ भूषणानीव भूषायै,गुणा बाधाकरा अपि । कथ्यते तत्फलं साक्षाल्लोकेऽपि तव सम्मते ॥५॥ तथाहि—विनयादेव सौभाग्यं, भाग्य विद्यार्थसम्पदः । लोकद्वयसुखस्यापि, भाजनं विनयान्नरः ॥६॥ ध्रुवं नम्रतया लोके, गुरुत्वं लभते नरः । छन्दोवर्ण इव स्तब्धैः पुनर्लघु-

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

रिति प्रथाम् ॥७॥ यथा यथा प्रकृष्टानां, पात्रं भवति सम्पदाम् । शाखीव फलभारेण, नम्रः साधुस्तथा तथा ॥८॥ सुवंशसम्भवः कोटिलाभयुक्तोऽपि कोविदः । कोदण्ड इव नम्रत्वादात्मन्यारोपयेद् गुणम् ॥९॥ श्रूयते विनये याऽद्य विक्रमस्य कथा किल । लोकेऽपि विनयस्याङ्गमिति सैव निगद्यते ॥१०॥ तथाहि—

## प्रथमा विनयोपरि विक्रमकथा ।

भरतेऽवन्तिदेशेऽस्ति, नानादेशान्तरागतैः । नरैरत्नैश्च रोचिष्णुरवन्तिनामतः पुरी ॥११॥ अद्वैतविक्रमोप्युच्च-स्त्रिविक्रमकलां दधत् ।तत्रोदारचरित्रोऽभूद् ,विक्रमो नाम भूपतिः ॥१२॥ विसृष्टार्थोऽपि यः श्रीमान् ,शक्तियुक्तोऽपि यः क्षमी। दधानोऽपि सदौन्नत्यं, पूज्येषु विनतो भृशम् ॥१३॥ ओजः-प्रसादमाधुर्य-सौकुमार्यादिसद्गुणा। सुकवेः कवितेवास्य,प्रियाऽऽसीत् कमलावती ॥१४॥ अन्यदाऽसौ निजाऽऽस्थानमिन्द्राऽऽस्थानसमं नृपः। दृष्ट्वा प्रमुदितोऽत्यन्तं,पप्रच्छेदं सभासदः॥ १५ ॥ अहो ! ब्रूत कला-विद्या-वस्तुविज्ञानमद्भुतम्। तत् किमप्यस्ति कुत्रापि,यन्मे राज्ये न विद्यते ?॥१६॥ ततः प्राह कलाविज्ञः,कोऽपि देशान्तरी नरः। हर्षोत्फुल्लमुखाम्भोजः,प्राप्यावसरमुच्चकैः ॥१७॥ भ्रान्तोऽस्मि बहुरत्नायां,पृथिव्यां सुचिरं परम्। त्वत्समो न मया दृष्टः,श्रीविद्यावेणिसङ्गमः ॥१८॥ पाताले वासुकिर्देव !,दिवि शक्र उभाविमौ । अदृष्टावपि मन्येते, पृथिवीन्द्र ! तव श्रिया ॥१९॥ महतामवधिः स्वामिन् !, गगनं कथ्यते बुधैः । तत्राप्येकः कलावांस्ते, त्वद्राज्ये तु सहस्रशः ॥२०॥ अवस्त्वेव हि तद्वस्तु, निष्कला सा कला विभो ! । अज्ञानं तच्च विज्ञानं, यन्निलीनं नहि त्वयि ॥२१॥ यशःसंभारसुरभिर्विक्रमाक्रान्तभूतलः । ॐकार इव वर्णानां, त्वं राज्ञां धुरि सम्प्रति ॥२२॥ वाचस्पतिमतिर्मन्त्री, तवा-

---

१ विष्णुस्त्रिविक्रमः । २ कलावान्–सोमः ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ज्ञाजीविता जनाः । सहर्षप्रणताः सर्वे, प्रधाना मण्डलेश्वराः ॥२३॥ सहन्ते द्विषतां वीरा, न गन्धं गन्धहस्तिवत् । अनङ्गभरभुग्नाङ्ग-चङ्गोऽयं कामिनीजनः ॥२४॥ अस्ति कौतुकचित्रेन्द्रजालाद्यन्यदपि प्रभो ! । परकायप्रवेशाख्यां, किन्तु विद्या न विद्यते ॥२५॥ स-सम्भ्रमं नृपः प्राह, कुत्राऽऽस्तेऽसौ वदाऽऽशु मे । सोप्याह श्रीगिरौ देव !, सिद्धेश्वरनरान्तिके ॥२६॥विसृज्याथ सभां राजा, राज्यकाय स्वमन्त्रिणम् । न्यरोप्य नगराद्विद्याकौतुकी निशि निर्ययौ ॥२७॥ तादृग्राज्यसुखं हित्वा, दुःखान्यगणयन् पथि । नवार्थरसिकः सत्त्व-सहायो यात्यसौ मुदा ॥२८॥ यतः—नीचाः शरीरसौख्यार्थमृद्धिर्व्यापाय मध्यमाः । कस्मैचिदद्भुतार्थाय,यतन्ते पुनरुत्तमाः ॥२९॥ एवं च व्रजतो नित्यं, मानसोत्साहरश्मिभिः । आकृष्ट इव तस्याऽऽशु, श्रीगिरिर्निकटोऽभवत् ॥ ३० ॥ सिद्धेश्वराभिधं विद्यासिद्धं तत्रै-कदेशगम् । प्रसन्नास्यं नृपो दृष्ट्वा, तुष्टो नत्वा ततोऽवदत् ॥ ३१ ॥ त्वन्मूर्त्तिदर्शनेनैव, कृतार्थोऽहं मुनीश्वर ! । अयच्छन्नब्रुवाणोऽ-पि, जगदाह्लादयेच्छशी ॥ ३२ ॥ अतस्तव पदाम्भोजद्वयं दुर्लभसङ्गमम् । संसेविष्येऽनुजानीहीत्यनिषिद्धस्तथाऽकरोत् ॥ ३३ ॥ त-त्रैको ब्राह्मणोऽग्रेऽपि, विद्यायै तिष्ठते चिरात् । तत्कृतो विनयोऽप्यस्य, दुःखाय मुहुरर्थनात् ॥ ३४ ॥ बीजमुप्तं शुभक्षेत्रे,स्वयमेव यथो-दयेत् । तथाऽन्यदपि सत्कर्म, दैन्यं क्लेशाय केवलम् ॥३५॥ आसनन्यास-चरणक्षालनाद्यैर्मनोगतैः । नृपस्य विनयैर्याच्ञारहितैर्मुमुदे गुरुः ॥३६॥ एकाग्रमनसा ध्याता, देवाः शैलमया अपि । अचिरेणैव तुष्यन्ति, किं पुनश्चेतनो जनः ? ॥३७॥ अब्रवीच्च महाभाग!, सदाचारेण ते मया । ज्ञातं कोऽपि नरोत्तंसस्त्वं देशान्तरकौतुकी ॥३८॥ विनयात्तव तुष्टोऽस्मि, तत्त्वं विद्यां गृहाण मे । परकायप्रवेशा-ख्यां, त्वद्भक्तेः स्यां यथाऽनृणः ॥३९॥ तच्छ्रुत्वा विक्रमः स्वार्थशिथिलोऽग्रेतनं नरम् । चिरकालागतं दीनं, दृष्ट्वा दध्यौ लसद्दयः

---

१ व्यापो विस्तारः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥३९॥ अस्मिन् पुरःस्थिते हन्त !, निराशे गुरुबान्धवे । लब्धविद्यः कथं यामि, तदेतामस्य दापये ॥ ४० ॥ बभाषे च प्रभो !
पूज्य !, सेवाहेवाकिनश्चिरात् । अस्य विद्याप्रदानेन, प्रसादो मेऽस्तु तावकः ॥४१॥सविषादं गुरुः प्राह, मा दुग्धं पाययोरगम् । अयो-
ग्योऽयमपात्रे हि, विद्याऽनर्थकरी भृशम् ॥४२॥ यथा कोऽपि पुरा विद्यासिद्धः सिंहास्थिदर्शनात् । सिंहाङ्गं सकलं कृत्वा, सजीवं कर्तु-
मुद्यतः ॥४३॥ वारितो बन्धुना किन्तु, सजीवमकरोन्मदात् । हतोऽसौ तेन सिंहेन, त्वमप्येवं विभावय ॥४४॥ एवमुक्तोऽपि सिद्धस्य,
परार्थव्यसनी नृपः । लगित्वा पादयोर्बाढं, तस्मै विद्यामदापयत् ॥४५॥ गुर्वादेशोपरोधेन, जगृहे च स्वयं नृपः । विधिश्च साधने त-
स्याः, सिद्धेन कथितः स्फुटम् ॥४६॥ अविसृष्टोऽपि गुरुणा, द्विजोऽभूद् गन्तुमुत्सुकः । न तु राजा विसृष्टोऽपि, गुरुवात्सल्यभारितः
॥४७॥ यतः—कलाकलापसम्पन्ना, उपकर्तुः पराङ्मुखाः । न भवन्ति महात्मानः, सरसः शिखिनो यथा ॥४८॥ त्वं स्वकृत्यपरो
भावी, धर्मध्यानपरा वयम् । अनिच्छन्तमपीत्युक्त्वा, विससर्ज नृपं गुरुः ॥४९॥ स्वयं विधाय विप्राच्च, विधाप्य विधिसाधनम् । सि-
द्धविद्यो नृपस्तेनानुगतः स्वपुरं ययौ ॥५०॥ द्विजायात्मीयवृत्तान्तं, सौहृदेन न्यवेदयत् । स्वच्छत्वेन गम्भीरोऽपि, दर्शयत्युदधिर्मणीन्
॥५१॥ गुप्तवृत्त्या दिनं स्थित्वा, बहिर्मुक्त्वा द्विजं निशि । निजराज्यस्थितिं द्रष्टुमेकाकी प्राविशत्पुरम् ॥५२॥ पूर्ववद् देवहर्म्येषु, सङ्गी-
तोसवनाटकैः । सुरम्यं व्यवहाराद्यं, सद्धर्माचारधार्मिकम् ॥५३॥ क्षत-स्खलित-शङ्कादौ, चिरं जीवतु विक्रमः । इत्यूचानं जनं हृष्टो,
वीक्षते सर्वतः पुरम् ॥५४॥ युग्मम्॥ तदा च नृपसौधान्तः, पट्टकुञ्जरमृत्युना । तल्लोकमाकुलं दृष्ट्वा, ययौ राजा द्विजान्तिके ॥५५॥
उवाच मित्रं भो ! विद्याविलासरसिको गजे । प्रविश्य चरितं किञ्चिद्,वीक्षे प्रासादमध्यगम् ॥५६॥ एकान्ते मम कायस्य, तत् त्वं
प्राहरिको भव । ज्ञातस्वरूपः प्रकटो, भविष्यामि त्वया सह ॥५७॥ इति स्वं तत्र मुक्त्वाङ्गं, राजा गजकलेवरम् । प्रविवेश करीन्द्रोऽपि,



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

पूर्ववद्विलसत्यलम् ॥५८॥ न केवलं गजो राज्ञा, सजीवो विहितो निजः । राजवर्गोऽपि तन्मृत्युमृतः सर्वोऽपि जीवितः ॥५९॥ प्राव-र्तन्त गजेन्द्रस्य, विविधा मङ्गलोत्सवाः । कायान्तरगतस्यापि, राज्ञो भोगप्रदो विधिः ॥६०॥ इतश्च दुर्जनात्माऽसौ, तनुग्राहरिको नरः। विश्वासघातको मित्रद्रोही लोभादचिन्तयत् ॥६१॥ महादारिद्र्यदग्धेन, किमनेनाङ्गकेन मे ? । प्रविश्य विक्रमस्याङ्गे, कुर्वे राज्यं निराकुलः ॥६२॥ तथा कृत्वा स सौधान्तः, प्रविष्टः कृत्रिमो नृपः । योग्यभूमिमजानानश्चकितोऽरण्यजीववत् ॥६३॥ ससम्भ्रमागता-मात्यबाहुलग्नः सदःस्थितम् । सिंहासनमलश्चक्रे, प्रणतो राजपूरुषैः ॥६४॥ करीन्द्रो जीवितो दिष्ट्या, नरेन्द्रोऽपि समागतः । दुग्धे-ऽसौ शर्करापात इत्यूचानोऽमिलज्जनः ॥६५॥ तेषां यथोचितालापप्रसादमभिवाञ्छताम् । नामकर्माद्यजानानो, न करोति किमप्यसौ ॥६६॥ सहर्षमागता देव्याः, प्रियसख्योऽपि तादृशम् । लीलाविलासलालित्यरसं नासादयन्त्यतः ॥६७॥ अमात्यः पालितप्राज्यराज्यः सम्भाषणं नहि । मानं प्रधानसामन्ता, लभन्ते नापि नागराः ॥६८॥ ते तादृशं नृपं दृष्ट्वा, चिन्तयन्त्येष किं सुरः । दैत्यो वा राज-रूपेण, शून्यराज्यमधिष्ठितः ? ॥६९॥ नैतत्तु घटते पादौ, येनास्य लगतः क्षितौ । निमेषश्च दृशोरस्तेन, चित्तचालः कुतोऽप्यसौ ॥७०॥ चित्तं विरहसन्तप्तं, कमलावचनामृतैः । निर्वाप्यं चेदित्यमात्यस्तां चेट्याऽऽनाययत् ततः ॥७१॥ स कृत्रिमनृपो दध्यावहो ! मे सु-मना विधिः । येनानीत इमां भूमिं, मनसोऽपि सुदुर्लभाम् ॥७२॥ राज्ञी सम्भ्रान्तमुत्थाय, मण्डयत्यासनादिकम् । दृष्ट्वा च तं पुन-र्भूपं, मूर्छितेव पतत्यधः ॥७३॥ उक्ता चेटीभिरुत्थाप्य, किमिदं देवि ! ? कथ्यताम् । नृपोऽप्याह कथं देवि !, मूर्छाघातो मदागमे ? ॥७४॥ तद्वचःश्रवणाद् जातमहार्तिः साऽप्यचिन्तयत् । एष प्रिय इवेक्ष्येत, दाहं दत्ते तु वैरिवत् ॥७५॥ लब्धोपायाऽवदद् देवी, देव ! यात्राक्षणे मया । शुभागमाय वश्चण्डया, उपयाचितकं कृतम् ॥७६॥ यथा देवि ! प्रपूज्य त्वां, वीक्षे दृष्ट्याऽपि वल्लभम् । तदकृत्वेक्ष-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

माणा त्वां, चण्डयाऽहं पतिता भुवि ॥७७॥ तत्पूजासमयं देव!, कथयिष्याम्यहं स्वयम् । इति दत्तोत्तरो राज्ञ्या, भवनान्निर्ययौ नृपः ॥७८॥ इतश्च तं गजं मन्त्री, राजपाट्यै व्यभूषयत् । सुचिरादागतं येन, स्वामिनं वीक्षते जनः ॥७९॥ यथा राजाऽपि नगरं, दृष्ट्वा मुदितनागरम् । स्वस्थीभूतमनाः सर्वमालापयति पूर्ववत् ॥८०॥ अन्योऽन्यमथ जल्पन्ति, हस्तिभृङ्गारकारकाः । अहो! शून्य इव स्वामी, देशान्तरगमादभूत् ॥८१॥इत्याकर्ण्य स दन्तीन्द्रो, व्याकुलश्चिन्तयत्यहो ! । किमिदं हा ! द्विजो राज्ये, मन्मूर्त्या ललति ध्रुवम् ? ॥८२॥ गुरुणा वारितेनाऽपि, यद्विद्या दापिता मया । विप्राधमाय तस्येदं, शीघ्रमासादितं फलम् ॥८३॥ अविश्वासमयीं नीतिमभ्यस्तां बाल्यतोऽस्मि यत् । विस्मार्य तस्य विश्वस्तस्तत् किञ्चिद् दैवतं ध्रुवम् ॥८४॥ नीचोऽप्युच्चैर्भवेद् दैवादुच्चोऽपि हि लघुर्भवेत् । सैव विद्या श्रियं तस्य, कुरुते हरते मम ॥८५॥ कलत्रपरिवाराद्यं, वस्तु कायानुगं भुवि । काये व्रजति तत्सर्वं, परकीयं ममाऽभवत् ॥८६॥ यथेहाध्यक्षतो दृष्टं, तथाऽमुत्राऽपि देहिनः । कर्मैव सहगं तेन, सुकृतं कुर्वते बुधाः ॥८७॥ भवतु प्राप्तकालीनं, कुर्वे तावत्पलायनम् । मा ममास्तु तदारोहे, पापस्योपरि चूलिका ॥८८॥ सम्प्रधार्येदमुत्कर्णो, व्याकुञ्चितकरः करी । वेगेन गन्तुमारब्धो, जज्ञे कलकलो महान् ॥८९॥ पादचाराऽश्ववाराद्यैर्दधावेऽनु सहस्रशः । अधिकाधिकगत्याऽस्य, निर्विण्णैस्तु न्यवर्त्तत ॥९०॥ दूरारण्ये करी गत्वा, श्रान्तो दध्यौ विषण्णधीः । क्व भूसंज्ञाभवत्कार्यं, राज्यं क्वेदं पलायनम् ? ॥९१॥ किंवा स्तोकमिदं पुंसो, दुर्बुद्धेः खलसङ्गिनः । इति चिन्ताब्धिक्षुत्-तृष्णा-तापैराचक्रमे नृपः ॥९२॥ सम्प्राप्य वटवृक्षस्य, च्छायां विधुरबन्धुवत् । स्वस्थीभूतः क्षणं तत्र, नरमेकं ददर्श सः ॥९३॥ वटपादान्तरस्थं तं, धनुर्गोलिकया शुकान् । घ्नन्तं वीक्ष्य स दुष्पूरदुर्वहाङ्गेन खेदितः ॥९४॥ दध्यौ किममुनाङ्गेन, श्रेयान्वृद्धौ हि विस्तरः ? । तद्विशामि शुकस्याङ्गमिति राजा तथाऽकरोत् ॥९५॥ युग्मम् ॥ व्याधमाह शुको भद्र !, बहुकीरवधेन किम् ? ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अवन्त्यां नय मां टङ्कसहस्रं लप्स्यसे ध्रुवम् ॥९६॥ किंतु मे प्रत्ययो जन्यस्तच्छ्रुत्वा मुदितो नरः । अभयप्रत्ययं तस्योत्पाद्य जग्राह तं करे ॥९७॥ पाययित्वा जलं चूर्णीं, ढौकयित्वा सुनिर्वृतम् । शुकं कृत्वा गतोऽवन्तीं, व्याधो राजपथे स्थितः ॥९८॥ लोको वदति किं मूल्यं, सहस्रं भाषते नरः । कीरं पृच्छति यल्लोकस्तत्तच्छास्त्रं पठत्यसौ ॥९९॥ याचितादधिकं मूल्यं, जनो दत्ते परं नरः । नादत्ते कीरवाक्येन महार्घ्योऽभूत् ततोऽधिकम् ॥१००॥ चेटयोऽथ कमलावत्याः,प्राप्तास्तन्मर्मकोविदः । कीरस्तदेकया पृष्टः, पपाठ मधुराक्षरैः ॥ १०१ ॥ तवाक्षिविशिखैर्विद्धः, सुभगोऽस्मीति जीवति । अविद्धो म्रियते तन्वि ! धनुर्विद्येयमद्भुता ॥१०२॥ किञ्चित् त्वमपि भाषस्व,यत् पठाम्यनु शिष्यवत् । तयोचे गुरुरेव त्वं, कस्य शिष्यत्वमर्हसि ? ॥१०३॥ इति हर्षोत्सुका चेटी, गत्वा देव्यै न्यवेदयत् । न दृष्टो न श्रुतः कीरः, सुकविः स्वामीनीदृशः ॥ १०४ ॥ तदीयवर्णनात्यर्थतुष्टा राज्ञी व्यचिन्तयत् । काव्यशास्त्रविनोदाय, ददौ मे प्राभृतं विधिः ॥ १०५ ॥ सोत्कण्ठं चावदच्चेटी, रे याहि त्वरितैः पदैः । पुंसो यद्याचितं दत्त्वा, शुकराजमिहानय ॥ १०६ ॥ चेट्या तथाकृते व्याधः, कृतार्थः स्वास्पदं ययौ । कीरं कराम्बुजे कृत्वा, नीतो देव्यन्तिके तया ॥१०७॥ दृष्ट्वा सन्मुखमायान्तीं, हर्षेण कमलावतीम् । दक्षिणं भुजमुत्क्षिप्य, पपाठ मधुरं शुकः ॥१०८॥ देवि ! वामभुजस्थत्वद्धारोद्धाराय विक्रमः । प्रतिमानमिव क्षोणीं, धत्ते दक्षिणबाहुना ॥ १०९ ॥ सा हसित्वाऽऽह कीर ! त्वमियतेदं ब्रवीषि यत् । धरैश्वर्यं विना नारीभारः क्रष्टुं न शक्यते ॥ ११० ॥ साधु साधु त्वया प्रोक्ता, भूरिभारकरा वयम् । सत्यवाक्येन को न स्यात् , तुष्टो यः पण्डितो भवेत् ? ॥ १११ ॥ लज्जयेति शुकोपज्ञां, गोपयित्वात्मवर्णनाम् । सा स्वर्णपञ्जरे चारुनिषद्ये तमधारयत् ॥ ११२ ॥ स्वयं संस्कुरुते स्थानं, परिमार्जन-धूपनैः । सज्जाम्बु-दाडिमीबीजाऽऽमलकानि च यच्छति ॥ ११३ ॥ अन्यान्यपि तदिष्टानि, पेयभक्ष्याण्यढौकयत् । तत्संलापामृतैर्नित्यमात्मानं प्रीणयत्यसौ ॥ ११४ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पठ प्रश्नोत्तरं किंचिदिति राज्ञ्या नियोजितः । शुको विद्याविनोदाय, पपाठ सहसैव सः ॥ ११५ ॥ योगी किं ध्यायते ध्याने ?, गुरवे क्रियते किमु ? । प्रतिपन्नं सतां कीदृग् ?, आदौ छात्राः पठन्ति किम् ? ॥११६॥ इति पृष्टे यदा राज्ञी, चिन्तयन्त्यपि सा चिरं । न जानाति तदा सोऽदाद्, ॐनमः सिद्धमुत्तरम् ॥ ११७ ॥ न लगेद् नाग-नारङ्गे, निम्ब-तुम्बे पुनर्लगेत् । लगेत्युक्ते लगेन्नैव, मा मेत्युक्ते भृशं लगेत् ॥ ११८ ॥ तत्किं मे कथ्यतामेवं, भूयः पृष्टा शुकेन सा ? । क्षणं विमृश्य देव्याह, हुं ज्ञातं ओष्ठसम्पुटम् ॥११९॥ विहिता निर्विषा नागा, देवाः शक्तिविवर्जिताः । निश्चेष्टाश्च यथा सिंहाः, सा बालैर्ध्रियते करे ॥ १२० ॥ केयमित्युदिते राज्ञ्या, द्रुतं ज्ञात्वा शुकोऽब्रवीत् । शृणु ज्ञातं मया देवि !, सा चित्रकरलेखनी ॥१२१॥ गजा येन हताः सिंहाः, क्रान्ता व्याकुलिता भटाः । स कोलिकगृहे वीरो, देवि ! बद्धो-मयेक्षितः ॥१२२॥ शुकोदितमिति प्रश्नं, श्रुत्वा स्मृत्वा च सा जगौ । हसन्ती यदहो ! वीर !, ईदृशो मशकः स्फुटम् ॥१२३॥ मृणा-लाभमहिव्यूहमञ्जनं क्षीरसन्निभम् । नभः कर्पूरसंकाशं, राज्ञ्या गूढचतुर्थके ॥१२४॥ इति पृष्टे शुकः प्राह, करोति यशसा महान् । दो-षोऽपि गुणतां याति, विषमप्यमृतायते ॥१२५॥ [ "मित्राणि शत्रवोऽपि स्युः" इति शुकेन गूढचतुर्थके पृष्टे राज्ञी चतुर्थपदं प्राह— अनुकूले विधौ नृणाम्"] कृपणोऽपि नृपाघ्र्यः स्याद्, उदारस्यापि लौल्यता । भावाभावेन यस्यायमाख्यातोऽपि न बुध्यते ॥१२६॥ [इति राज्ञ्या पृष्टे शुकः प्राह—आकारः] साकारः कष्टकारी स्यात्, सविकारः सतां मतः । सनिकारो जनाभीष्टः, केवलस्तु निरर्थकः ॥१२७॥ [इति शुकेन पृष्टे राज्ञी प्राह—धिकारः] नक्तमादौ दिनस्यान्ते, प्रदोषादपरोऽस्ति यः । मानसान्तर्गतोऽप्येष, लक्ष्यते न कथञ्चन ? ॥ १२८ ॥ [इति राज्ञ्या पृष्टे शुकः प्राह—नकारः] लक्ष्मी-खेद-निषेधार्थ-ब्रह्म-चक्राङ्ग-शर्मणाम् । के शब्दा वाचकाः खान्तं, ब्रूहि किं णान्तमिच्छसि ? ॥ १२९ ॥ अर्थिनां का सदा चित्ते ?, का दग्धा कपिना पुरा ? । इक्षुयष्टेः किमिच्छन्ति ?, किं



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

च हंसस्य सुन्दरम्?॥१३०॥ सुकवीनां वचः कीदृक्?, शुकेन विषमे कृते। इति प्रश्ने यदा राज्ञी, कमला नावदत् तदा॥ १३१॥ एकद्वि-सर्ववर्णानां, परिपाटीक्रमेण सः। शुक एवोत्तरं चक्रे, ईहालङ्कारसङ्गतम्[1]॥१३२॥ हितोपदेशं परमं, किञ्चित् पठ सुभाषितम्। इति राज्याऽन्यदा पृष्टः, कीरः प्राह निशम्यताम् ॥१३३॥ सुपरीक्ष्य कृतं कार्यं, सुविमृश्योदितं वचः। इन्द्रियाणि सुदान्तानि, विकुर्वन्ति कदापि न ॥१३४॥ चित्तमार्जवसम्पन्नं, वचो मधुरिमाश्चितम्। वपुर्विनयनम्रं च, न भवत्यमहात्मनाम् ॥१३५॥ मुहूर्त्तैकाऽवधिः क्रोधो, यथा-कालावधि व्रतम्। प्रतिपन्नं पुनर्लोके, महतां जीविताविधि ॥१३६॥ स्वश्लाघा परनिन्दा च, मत्सरो महतां गुणे। असम्बद्धप्रलापित्व-मात्मानं पातयन्त्यधः ॥१३७॥ अपरद्रोहकं वाक्यं, प्रसन्ना वदनद्युतिः। मानसं श्रुतगम्भीरं, नरमूर्ध्वं नयन्त्यमी ॥१३८॥ यथा कोऽपि पुरा भूपः, कारयामास पण्डितैः। देशान्तरनराऽऽनीतत्रिकपालीपरीक्षणम् ॥१३९॥ तत्रैकस्याऽऽहितं कर्णे, सूत्रं वक्त्रेण निर्ययौ। तस्य मूल्ये कपर्दोऽभूत्, येनासौ यत् श्रुतं लपेत् ॥१४०॥ द्वितीयस्य पुनः कर्णे, क्षिप्तं कर्णेन निर्गतम्। तस्य मूल्ये कृतं लक्षं, येनासौ श्रुत-विस्मृतः॥१४१॥ तृतीयस्य तु निक्षिप्तं, कर्णेऽगाद् गलसम्मुखम्। अमूल्योऽसौ यतस्तस्य, तिष्ठति स्म हृदि श्रुतम् ॥१४२॥ तदेवं पर-दोषेषु, देवि! श्रुत्वा निदर्शनम्। सकर्णाः के न जायन्ते, गाम्भीर्यमयमानसाः ॥१४३॥ इति शुकोक्तिरक्तात्मा, प्रतिज्ञां कमलाऽकरोत्। जीवितं मरणं कीर!, त्वया सह मम ध्रुवम्॥१४४॥ सुधीरेतां शुकोऽप्याह, मैवं वद नृपप्रिये!। क्वाहं पशुलवः क्वासि, प्रिया विक्रमभूपतेः ॥१४५॥ किञ्च देवि! प्रियः स्नेहात्, कुरुते ते गतागतम्। त्वं तु तस्य कथं स्निग्धं, नालापमपि यच्छसि?

---

१ क्रमश उत्तराणि—ई, हा, अलम्, कः, आरः, सम्, कवर्गे खस्याऽन्तभूतो गकारः, टवर्गे णस्याऽन्ते तकारः। ईहा, लङ्का, रसम्, गतम्, ईहालङ्कारसङ्गतम्।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥१४६॥ तच्छ्रुत्वा कमला दीर्घं, निःश्वस्याह शुकोत्तम ! । प्रियं देशान्तराऽऽयातं, दृग् ब्रूते मे मनस्तु न ॥१४७॥ ततोऽहं क्षुभिता दत्त्वोत्तरं भूपं विसर्जये । त्वं तु प्रिय इव प्रीतिं,कुरुषे तदिदं ब्रुवे ॥१४८॥ ततो राजशुको दध्यौ,महाहर्षेण पूरितः । परकायप्रवेशाख्या, विद्या मे सफलाऽभवत् ॥१४९॥ देव्याश्चित्तपरिक्षा मेऽभविष्यत्कथमन्यथा ? । किञ्चानेनानुभावेन,भविताऽन्यदपि प्रियम् ॥१५०॥ पुनः प्राह शुकं देवी, तवामृतकिरा गिरा । तुष्टाऽतीवास्मि तत्किंचिद्, धर्मतत्त्वं वदाधुना ॥१५१॥ स ऊचे श्रूयतां देवि !, मया मुनिमुखात् श्रुतम् । परोपकारः पुण्याय, पापाय परपीडनम् ॥१५२॥ नास्त्यहिंसासमो धर्मो,न संतोषसमं व्रतम् । न सत्यसदृशं शौचं, शीलतुल्यं न मण्डनम् ॥१५३॥ उक्तं च—सत्यं शौचं तपः शौचं,शौचमिन्द्रियनिग्रहः । सर्वभूतदया शौचं, जलशौचं तु पञ्चमम् ॥१५४॥ स्नानं मनोमलत्यागो, दानं चाभयदक्षिणा । ज्ञानं तत्त्वार्थसम्बोधो,ध्यानं निर्विषयं मनः ॥१५५॥ गृहेऽपि वसतां नित्यमश्नतामपि श्रद्धया । मनःशुद्ध्या भवेद्धर्मस्तपसाऽपि न तां विना ॥१५६॥ उक्तं च—मन एव मनुष्याणां, कारणं बन्धमोक्षयोः । बन्धने विषयासङ्गि, मुक्तौ निर्विषयं पुनः ॥१५७॥ तथा हि—

पुरा सूरनृपः पुर्या, बहिरुद्यानमागतम् । मुनिं सोदरमाकर्ण्य, तत्रागात्सपरिच्छदः ॥१५८॥ मुनिं प्रणम्य भावेन, स्फुटरोमाञ्चभूषणः । निशम्य तन्मुखाद्धर्मं,गतः स्वभवनं नृपः ॥ १५९ ॥ पट्टराज्ञ्यपि सोत्कण्ठा, वन्दितुं देवरं मुनिम् । आपृच्छ्य नृपतिं सायं, जग्राहेत्थमभिग्रहम् ॥१६०॥ सोमाभिधं मुनिं प्रातर्मया सपरिवारया । वन्दित्वा पारयित्वा च, भोक्तव्यमिति नान्यथा ॥१६१॥ अथाऽन्तराले नद्यस्ति, पुरस्योपवनस्य च । निशीथे साऽऽथ पूरेणाऽऽगताऽगाधा वहत्यलम् ॥१६२॥ तेनाकुलमना राज्ञी, प्रभाते निजवल्लभम् । पप्रच्छ कथमद्याऽसौ, पूर्यते मे मनोरथः ? ॥१६३॥ उवाच नृपतिर्देवि !, मा कार्षिः खेदमीदृशम् । येनेदं



Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

सुकरं सुस्था, गच्छ त्वं सपरिच्छदा ॥१६४॥ अर्वाक्तीरे नदीदेवीं, समाह्वानपुरस्सरम्। योजयित्वा करौ शुद्धमानसेदं वदेर्वचः॥१६५॥ हे देवि! नदि ! भर्त्ता मे, देवरव्रतवासरात् । आरभ्य ब्रह्मचारी चेद् , मार्गं देहि तदा द्रुतम् ॥१६६॥ तत् श्रुत्वा विस्मिता राज्ञी, दध्यौ किमिदमीदृशम्। असम्बद्धं नृपो ब्रूते,पञ्चमो लोकपालकः ? ॥१६७॥ भ्रातृव्रतदिनादूर्ध्वमस्य यत् पुत्रसन्ततिः । बभूव मयि तत्सर्वं,विदितं मे प्रतिव्रतम् ॥१६८॥ अथवा किं विकल्पेन, निकटः प्रत्ययोऽधुना ? । अन्यच्च निर्विकल्पाः स्युः, पतिवाक्ये पतिव्रताः ॥१६९॥ सती पत्युः प्रभोः पत्तिर्गुरोः शिष्यः पितुः सुतः। आदेशे संशयं कुर्वन् ,खण्डयत्यात्मनो व्रतम् ॥१७०॥ इति तुष्टा गता राज्ञी,सोपस्करपरिच्छदा । नदीतीरे मिलल्लोके, सङ्कटीभूतभूतले ॥१७१॥ तत्राहूय नदीं देवीं, कृतार्चा शुद्धमानसा। सा भर्तृकथितां सत्यश्रावणामकृत स्फुटम् ॥१७२॥ नदी च सहसा वामदक्षिणक्षिप्तवारिभिः। स्ताघीभूय ददौ पारं, गता राज्ञी परे तटे ॥१७३॥ प्रणम्य विधिना तत्र, धन्यमन्या मुनिं ततः। लब्धाशीर्मुनिना पृष्टा, नद्युत्तारविधिं सती ॥१७४॥ सर्वमाख्याय वृत्तान्तं, सा पप्रच्छ मुनीश्वरम् । असम्भाव्या कथं भर्तुर्घटते ब्रह्मचारिता ? ॥१७५॥ सोऽप्याह श्रूयतां भद्रे!, यदाहं जगृहे व्रतम्। तदारभ्य विरक्तात्मा,व्रताकाङ्क्षी भृशं नृपः ॥१७६॥ परं तादृग् न कोऽप्यासीद् , राज्यधूर्धरणक्षमः। तेनासौ कुरुते राज्यं,व्यवहारेण नो धिया ॥१७७॥ उक्तं च—परपुंसि रता नारी, भर्त्तारमनुवर्त्तते। तथा तत्त्वरतो योगी,संसारमनुगच्छति ॥१७८॥ तदेवं गृहवासेऽपि,पङ्केऽब्जस्येव तस्थुषः। निर्लेपमनसो राज्ञो, घटते ब्रह्मचारिता ॥१७९॥ मुनिं नत्वा ततो राज्ञी, वहन्ती परमां मुदम्। वनस्यैकतमे देशे, गत्वा वासितवत्यसौ ॥१८०॥ कारयित्वा रसवतीं, स्वपरिच्छदहेतवे। पारयित्वा मुनिं पूर्णाभिग्रहा बुभुजे स्वयम् ॥१८१॥ आप्रष्टुं गतया देव्या, पुनः पृष्टो मुनिः कथम्। नद्युत्तार्या मयेदानीं ?, मुनिराह प्रशान्तवाक् ॥१८२॥ नदी देवी त्वया भाण्या, यद्यसौ मुनिराव्रतात् । उपोषितश्चरेन्नित्यं, तदा मार्गं प्रयच्छ मे

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

॥१८३॥ पुनर्विस्मयमापन्ना, राज्ञी नद्यास्तटं गता। श्रावयित्वा मुनेर्वाक्यं, नदीं तीर्त्वा ययौ गृहम् ॥१८४॥ राज्ञो निवेद्य तत् सर्वं, पप्रच्छ च कथं मुनिः। उपोषितः स्याद् यः स्वेन, पारणं कारितो मया ? ॥१८५॥ राजाख्यद् देवि ! मुग्धाऽसि, धर्मतत्त्वं न विन्दसि। समचित्तो महात्माऽयमशनेऽनशनेऽपि वा ॥१८६॥ तथा—अकृताऽकारितं शुद्धमाहारं धर्महेतवे। अश्नतोऽपि मुनेर्नित्योपवासफलहेतवे ॥१८७॥ मनो मूलं वचः स्कन्धः, क्रियाः शाखादिविस्तरः। धर्मवृक्षस्य तन्मूले, दृढे सर्वं प्रजायते ॥१८८॥ स्वभर्तुर्देवरस्याऽपि, माहात्म्यं वीक्ष्य तादृशम्। अनुमोदनयैवात्मा, तया राज्या पवित्रितः ॥१८९॥ यदिदं गदितं धर्मतत्त्वमाख्यानसंयुतम्। मया कीरेण ते देवि ! ज्योत्स्नाधवलनं हि तत् ॥१९०॥ सतीनां यत् स्वभावेन, सज्ज्ञानं मानसं भवेत्। तेन कूटे स्खलत्येव प्रौढपण्डितवद् ध्रुवम् ॥१९१॥ सुविचारं सगर्भं च, वचः श्रुत्वा शुकादिदम्। राज्ञी दध्यौ न सामान्यः, कोऽप्यसौ ज्ञानवानलम् ॥१९२॥ मच्चित्तस्खलनात् कूटो, नृपोऽयमिदमस्य गीः। समाख्यातीति हृष्यन्त्या, देव्या निद्रा समागमत् ॥१९३॥ अथ तत्रेक्ष्य निर्जीवं, शुकात्मा गृहगोधकम्। विवेश वीक्षितुं राज्याः, शीलवत् पालनं गिरः ॥१९४॥ तावद् देवी स्वयं बुद्धा,शुकेन्द्रं वीक्ष्य निःस्वनम्। प्रबोधयितुमारब्धा, मृदुभिश्चाटुभिः शतैः ॥ १९५ ॥ वद किं नाद्य मे कीर !, सुधया सिञ्चसि श्रुती ?। यो मां बोधितवांस्तं त्वां, प्रत्युताहं विबोधये ॥१९६॥ विहाय निद्रामुत्तिष्ठ, पठ प्रभातमङ्गलम्। लसज्ज्ञानप्रदीपानां, सतां निद्रातमः कुतः ? ॥१९७॥ किं नाद्याप्युत्तरं दत्से, कथं रुष्टो ममोपरि। आत्मरूपे त्वयि स्वप्नेऽप्यलीकं नैव चिन्तये ? ॥ १९८ ॥ इत्यादिगदितैर्यावद्, बोधितोऽपि न बुध्यते, सम्भ्रान्ता तावदुत्थाय, सा करेणाऽस्पृशच्छुकम् ॥१९९॥ तथापि न श्वसित्येष, देवी मुर्छां गता ततः। क्षणेन लब्धचैतन्या, रुरोद प्रललाप च ॥२००॥ हा ! तवाकस्मिकं कीर !, दैवकं किमभूदिदम्। दुर्दैव ! वद किं दग्धस्त्वयाऽयं चन्दनोपमः ? ॥ २०१ ॥ देवोऽपि घननीरेण विध्यायति



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भवान् पुनः । न निवृत्तोऽसि कीरस्य, वाक्यामृतशतैरपि ॥२०२॥ हा ! हताऽहं विहङ्गेन्द्र !, त्वद्वाक्याधारजीविता । हा ! मृषावचनाऽभूवं, क्षणं मृत्युविलम्बनात् ॥२०३॥ इति मृत्युकृतोत्साहा, शुकाङ्गे स्नानलेपनम् । कृत्वाऽन्यदपि तत्कालोचितं सा कर्तुमुद्यता ॥२०४॥ तज्ज्ञात्वा कृत्रिमनृपश्चेटीभ्योऽभवदाकुलः । हा ! हा ! निष्कमलं राज्यं, वृथा मे भविताऽखिलम् ॥२०५॥ तद्गत्वा बोधयाम्येतां, निश्चित्यैवं तथाऽकरोत् । परं सम्बुध्यते नैव, ततः स पुनरब्रवीत् ॥२०६॥ किं जीविने शुके देवि !, जीवसीति प्रतिश्रुते ? । एवमित्युदिते भूपो, दध्यौ सिद्धं समीहितम् ॥२०७॥ शुकं जीवयुतं कृत्वा, नीत्वाऽन्यत्र विमुच्य च । प्रतिज्ञां पूरयित्वाऽस्याः, प्रवेक्ष्यामि निजां तनुम् ॥२०८॥ इत्येकान्ते तनुं मुक्त्वा, कीरमाविश्य सोऽललत् । नृपोऽपि गृहगोधाङ्गं, त्यक्त्वा स्वतनुमाविशत् ॥२०९॥ रविक्रान्ताभ्रपटलीमिव तेजस्विनीं तनुम् । दधानो विक्रमनृपो, लघु देव्यन्तिके ययौ ॥२१०॥ दर्शनात्तस्य कमलमालेव कमलावती । सद्यो विकाशमापन्ना, श्रिया च समलङ्कृता ॥२११॥ मूर्त्तिर्जाया च सत्येव, राज्ञ्यो याऽन्यनरागमे । निष्कला सकला चैव, सद्यः स्वपतिसङ्गमे ॥२१२॥ दृष्ट्वा पूर्ववदालापं, गतिं वेषं निरीक्षणम् । रुदन्ती पादयोः पत्युः, सहसोत्थाय साऽलगत् ॥२१३॥ जगौ च जीवितं स्वामिन्नेकं देशान्तरेण ते । बभूव दुःखमपरं, तव कूटप्रपञ्चतः ॥२१४॥ कथं कायान्तरेणाऽहं, वराकी विप्रतारिता । देशान्तरकलालाभे, परीक्षा मयि किदृशी ? ॥२१५॥ यदेवमपि निर्व्यूढं, महिलामात्रया मया । प्रभावस्तदयं सर्वस्तव पादप्रसादजः ॥२१६॥ अधुनाऽखिलं तावत्स्वस्वरूपं निरूप्यताम् । नृपः प्राह तव प्रेयान्, कीरोऽसौ कथयिष्यति ॥२१७॥ राज्ञ्याह देव ! को हेतुर्यदर्थे मृत्युराहृतः । स दृष्टोऽप्यधुना बाढमनिष्टो मेऽभवच्छुकः ? ॥२१८॥ नृपः कीरं करे कृत्वा, जगाद किमिदं द्विज ! । सोऽप्याह यद् गुरुस्वामि-मित्र-द्रोहकृतां भवेत् ॥२१९॥ त्वं मे स्वामी नरैश्वर्याद्, गुरुर्विद्याप्रदापनात् । मित्रं विश्वासतः सर्वं, तल्लुप्तं लोपवन्मया॥२२०॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

राजा वदति भो विप्र !, किं हीनमिदमुच्यते ? । मयैव तव साहाय्यात्, कृतो विद्यापरिश्रमः ॥२२१॥ स पुनः प्राह साहाय्यं, यादृशं विहितं मया । तत्सर्वं वेत्सि देव ! त्वं, न्यायसीमामहोदधे ! ॥२२२॥ निजगेह-तनुभ्रष्टं, मित्र-स्वामि-गुरुद्रुहम् । द्रष्टुं स्प्रष्टुं च मां पापं, तव नाथ ! न युज्यते ॥२२३॥ सती न कमला तुल्या, न त्वया सदृशो महान् । मया समो न पापात्मा, तत्त्वं राज्यं चिरं कुरु ॥२२४॥ मां तु वामाङ्घ्रिणा स्पृष्ट्वा, मुञ्च क्वापि यथा निजम् । कर्म सेवे त्वयैतेन, दुष्टशिक्षा कृता भवेत् ॥२२५॥ तन्निशम्यानुकम्पार्द्रमना विस्मार्य दुष्कृतम् । नृपः प्रोवाच या विद्या, ममाप्येषा तवाप्य हो ! ॥२२६॥ यत्कथं पादसंस्पर्शं, त्वमर्हसि व्रजेप्सितम् । परोपकारी धर्मिष्ठः, क्वापि धर्मेश्वरो भव ॥२२७॥ इति तं विक्रमो मुक्त्वा, देव्या कमलया युतः । राज्य चक्रे भद्रकात्मा, धर्मकर्मपरायणः ॥२२८॥ इत्येवं विनयादाप्ता, विद्या निर्वाहसुन्दरा । अभूत्सैवाऽविनीतस्य, महानर्थविधायिनी ॥२२९॥

## द्वितीया विवेकोपरिसुमतिकथा ।

इयता विनयः प्रोक्तो, विवेकः कथ्यतेऽधुना । यं विना शोभते न श्री, रूपं चक्षुर्विना यथा ॥२३०॥ यथाद्रिषु गुरुर्मेरुर्ग्रहेषु दिवसाधिपः । चिन्तामणिश्च रत्नेषु, विवेकोऽपि गुणेष्विति ॥२३१॥ भोज्ये वचसि दानादौ, सद्विवेकान्नरः पराम् । प्रतिष्ठां लभते लोके, दिव्यघाटादिवोपलः ॥२३२॥ विवेकेनाऽविवेकेन, धर्मो यैर्विहितः पुरा । तेऽत्र क्रमेण जायन्ते, पतयः पत्तयः श्रियः ॥२३३॥ विवेकदीपकालोकसप्रकाशीकृतेऽध्वनि । चरन्तो न स्खलन्त्येव, कलिध्वान्तेऽपि कोविदाः ॥२३४॥ विवेको गुरुवत्सर्वं, कृत्याकृत्यं प्रकाशयेत् । सन्मित्रवदकृत्याच्च, वारयेत्सुमतिर्यथा ॥२३५॥

तथाहि—श्रीसेनः श्रीपुरेऽस्ति स्म, राजा राज्यमहारथम् । यो निर्वाहितवान् पुष्टन्यायधर्मवृषः सुखम् ॥२३६॥ पुरोधास्तस्य



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सोमाख्यः, सद्गुणक्रमिको हितः। कुलोद्योतनदीपाभपुत्राभावात् सुदुःखितः ॥२३७॥ अन्यदा त नृपः प्राह, तवेयमनपत्यता। यथा मां बाधते बाढं, भवन्तं सोम! नो तथा ॥२३८॥ निर्व्यूढोऽयमियत्कालमावयोरन्वयक्रमः। अतः परं मत्पुत्रस्य, कः पुरोधा भविष्यति? ॥२३९॥ अवंशपतिते तस्मिन्, विश्वासः कीदृशो भवेत्?। तदेवमपि कस्मात्त्वं, निश्चिन्त इव दृश्यसे? ॥२४०॥ स प्राह चिन्तया देव!, किं परायत्तवस्तुनि?। जीवितं सन्ततिर्द्रव्यं, दैवायत्तमिति त्रयम् ॥२४१॥ उक्तं च—आत्मायत्ते गुणाधाने, नैर्गुण्यं वचनीयता। दैवायत्ते पुनः कार्ये, पुंसः का नाम वाच्यता?॥२४२॥ नृपोऽजल्पदुपायोऽस्ति, दैवस्याऽप्यनुकूलने। आराधय निजां कृत्वा, साहसं कुलदेवताम् ॥ २४३ ॥ धर्माय पूज्यते देवो, विघ्नशान्त्यै तु देवता। तत्तस्यास्तामकुर्वत्याः, किं वृथा पूजनेन भोः!? ॥ २४४ ॥ इति राज्ञाऽर्पितोपायः, स देव्या भवनं गतः। शुचिर्भूत्वा पुरस्तस्या, दर्भसंस्तरके स्थितः ॥२४५॥ पुत्रदानप्रसादं मे, यदा देवि! करिष्यसि। तदाऽहं भोजनं कर्तास्मीत्यभिग्रहमग्रहीत् ॥२४६॥ तृतीयदिवसे देवी, क्षुभिता तस्य सन्ततिम्। अपश्यन्ती गता सिद्धयक्षस्यान्तिकमब्रवीत् ॥२४७॥ किं कुर्वे भद्र! कष्टं मे, वर्त्ततेऽद्य यतो द्विजः। पुत्रं मां याचते नास्ति, स त्वस्य ननु तादृशः ॥२४८॥ ततोऽसौ मरणं कर्त्ता,स्यादपूजा जने मम। इति श्रुत्वा जगौ यक्षो, मुग्धे! सुकरमुत्तरम् ॥ २४९ ॥ तं ब्रूहि यदहो विप्र!, तव पुत्रोऽस्ति किन्त्वसौ। परदाररतश्चौरो, द्यूतकारश्च निश्चितम् ॥२५०॥ एषामेकतमो दोषो, विश्वाऽविश्वासहेतवे। दोषत्रययुजा त्वेष, किं सुतेन करिष्यति? ॥२५१॥ सा प्रहृष्टा गता यक्षोदितमाख्यात् पुरोधसः। सोऽपि प्रष्टुं गतो राज्ञो, देव्यादेशं शशंसिवान् ॥२५२॥ तद्विमृश्य महादक्षो, राजोचे सोम! याच्यताम्। देवी यदीदृशोऽप्यस्तु, पुत्रः किन्तु विवेकवान् ॥२५३॥ यतः—एकस्यैव विवेकस्य, तेजसा नाशमञ्जसा। यान्ति दोषा महान्तोऽपि, सिंहस्येव मतङ्गजाः ॥२५४॥ शिक्षामादाय तां विप्रो, गत्वा देवीमयाचत। तयाऽप्यनुमतं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सोऽथ, स्वगृहं गन्तुमुद्यतः ॥२५५॥ अथ तस्य द्वितीयाऽस्ति, पण्यनारी परिग्रहे। साऽपि तावद्दिनान्यस्थाद्, भूस्वापा मुक्तभोजना ॥२५६॥ तत्स्वरूपं निवेद्यासौ, चेटचानीतो बलादपि। तद्गृहे सोऽपि तत्रैव, स्नातभुक्तोऽवसन्निशि ।२५७॥ प्रभाते स्वगृहं गच्छन्, सोमो दध्यौ विषण्णधीः। धिङ् मां सुकुलजां जायामुपेक्ष्याऽवस्थितोऽत्र यः ॥२५८॥ देव्याः प्रसादमासाद्य, यदत्रैवावसं निशि। तन्मे कुक्षेत्रजः पुत्रो, भावी भाव्यं हि नान्यथा ॥२५९॥ धिङ् ममाजातपुत्रस्य, पुत्रजन्मन्यपि स्फुटः। नोत्सवो भविता हृष्टलोकः स्वज्ञातिवीक्षितः ॥२६०॥ ज्ञात्वेदं मयि भूपोऽपि, विरागं यास्यति ध्रुवम्। तथाप्यस्य सुनाथत्वात्, कथनीयं यथातथम् ॥२६१॥ इत्यागच्छन् नृपेणासौ, तादृशो वीक्ष्य जल्पितः। हर्षस्थाने कथं सोम!, विषण्ण इव दृश्यसे ? ॥२६२॥ किं विप्रतारितो देव्या, किं व्यलीकं तवाऽथवा? । देव्यादेशं स्वदोषं च, स स्वं निन्दंस्तमाख्यत ॥२६३॥ राजोचे कुरु मा खेदमीदृश्येव कुले यतः। तादृशा देवतादिष्टा, भवन्ति तव का क्षतिः ? ॥२६४॥ परं जन्मादितः कृत्वा, प्रकाश्यस्तावदेष न। दोषध्वान्तहरो यावन्न विवेकरविः स्फुटः ॥२६५॥ इति राज्ञो हितादेशसुधाविध्यातमानसः। गत्वा स्वभवनं जायां, सुगुप्तां तामकारयत् ॥ २६६ ॥ समयेऽजनि पुत्रोऽस्य, नृपस्याशु निवेदितः। प्रच्छन्नकृतसंस्कारो, व्यवर्द्धिष्ट क्रमेण च ॥ २६७ ॥ अथाध्ययनयोग्यं तं, ज्ञात्वा शास्त्रविचक्षणः। अध्यापयितुमारेभे, स्वयमेव पिता सुतम् ॥२६८॥ तस्य भूमीगृहस्थस्योपरिद्रुफलकासनः। छात्राणां च पुरो बाह्ये, शास्त्रमर्थापत्यसौ ॥२६९॥ निजाङ्गुष्ठे दवरकं, बद्ध्वाऽर्पयति सूनवे। सन्देहे सति चाल्योऽयमिति सङ्केतपूर्वकम् ॥२७०॥ महाप्राज्ञः पुनः पुत्रो, भिनत्ति स्तोकतो बहुः। अन्यदा नीतिशास्त्रस्य श्लोक एकोऽयमागतः ॥२७१॥ दानं भोगस्तथा नाशः, स्याद् द्रव्यस्य गतित्रयम्। यो न दत्ते न भुङ्क्ते च, तृतीया तस्य गतिर्भवेत् ॥२७२॥ तस्य व्याख्यानमाकर्ण्य,सूत्रं चालयते सुतः। पुनः स्पष्टमुपा-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ध्यायो, व्याख्यानयति पूर्ववत् ॥२७३॥ भूयोऽपि चालिते सूत्रे, पुरोधा रोषतोऽखिलान् । छात्रान् विसृज्य पुत्रं स्वमाकृष्य बहिरुक्तवान् ॥२७४॥ रे! समुद्रसमं शास्त्रं, तरितास्मि गोष्पदोपमे। श्लोकेऽतिसुगमाथऽस्मिन्नित्थं मूढः कथं भवान् ? ॥२७५॥ सुतोऽप्याह नतस्तात! भवतेह गतित्रयम् । वित्तस्य वर्णितं तच्च, विचारे मे न पूर्यते ॥२७६॥ यतः—आयासशतलब्धस्य, प्राणेभ्योऽपि गरीयसः । गतिरेकैव वित्तस्य, दानमन्या विपत्तयः ॥२७७॥ तच्च सर्वोत्तमं पात्रे, दयाधर्माय दुःखिते। या चक्रे कीर्त्तिघोषाय, स्नेहपोषाय बन्धुषु ॥२७८॥ भूतादौ विघ्ननाशाय, वैरघाताय वैरिषु। औचित्येन नृणां दत्तं, दानं न क्वापि निष्फलम् ॥२७९॥ भोगेन केवलं सौख्यमहिकं क्षणिकं भवेत् । लोकद्वयविनाशाय, तस्य नाशस्तु निश्चितम् ॥२८०॥ पुरोधास्तद् निशम्यास्य, विचारचतुरं वचः । मुदा हृदि न माति स, गत्वा चाख्यन्महीभुजे ॥२८१॥ नृपोऽप्याह च भो भद्र !, विवेकः सोऽयमुद्गतः। पूरयिष्यति येनासौ, मम ते च मनोरथम् ॥२८२॥ अहो विचार्यगाम्भीर्यमहो! अस्याद्भुता मतिः । उपाध्यायं च शास्त्रं च, याऽतिक्रम्य प्रवर्त्तते ॥२८३॥ यत्किञ्चित् खन्यमानस्य, यथा कूपस्य कस्यचित्। नालमुद्घाट्यते येन, खनकः प्लाव्यते जलैः ॥२८४॥ तथा च्छात्रस्य कस्यापि, शिक्ष्यमाणस्य किञ्चन। उन्मीलति तथा ज्ञानं, येन विस्माप्यते गुरुः ॥२८५॥ तत्त्वं गजेन्द्रमारोप्य, सत्वरं त्वमिहानय। तथा सुमतिरित्यस्य, नामास्तु स्वगुणार्जितम् ॥२८६॥ इत्यादिश्य नृपः प्रैषीत्परिवारं सहस्तिनम् । सोमोऽपि स्वगृहे गत्वा, निजबन्धूनमेलयत् ॥२८७॥ अथ कारितशृङ्गारं कृतकौतुकमङ्गलम्। हस्त्यारूढं महर्द्ध्याऽसौ, सुतं निन्ये नृपौकसि॥२८८॥ राजा सन्मुखमभ्येत्य,कृत्वा सत्कारमुज्ज्वलम्। पौरोहित्ये नियोज्यैनं, गृहं प्रति व्यसर्जयत् ॥२८९॥ राज्यमान्यतयैवं स, ययौ लोकेऽपि पूज्यताम् । पित्रादिबन्धुषु नतो, याति राज्ञोऽन्तिके सदा ॥२९०॥ करोति साधुसंसर्गं, शृणोति विविधं श्रुतम्।सार्थनामा क्रमाज्जज्ञे, सुमतिः सुकृतार्जनात् ॥२९१॥ विवेकमन्यदा ज्ञातुं, बहु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रुतमिमं नृपः। पप्रच्छ वद भोः! कस्माज्जीवानां विविधा स्थितिः?॥२९२॥ सुमतिः प्राह राजेन्द्र!, यच्चं तच्च विदन्नपि। मां पृच्छ-
सि प्रसादोऽत्र, हेतुस्तत्किञ्चिदुच्यते॥२९३॥ स्वस्वकर्मवशादेव!, जीवा वैचित्र्यभाजिनः। अभिनेयवशान्नानावेषं कुर्युर्यथा नटाः॥२९४॥
पुण्यपापमयं कर्म, तद्वशेन नृणां भवेत्। विवेकश्चाऽविवेकश्च, ताभ्यां सर्वं शुभाशुभम्॥२९५॥ हिंसा-ऽलीक-परद्रव्य-नारी-द्रोहमयं तमः।
प्रणश्यति विवेकार्कात् तदस्ते तु विजृम्भते॥२९६॥ श्रूयते भरतश्चक्री, विवेकेन पुरा क्षणात्। राज्यपङ्कनिमग्नोऽपि, प्राप पारंभ वाम्बुधेः
॥२९७॥ अविवेकात्पुनर्मत्स्यस्तण्डुलोऽन्यतिमिष्वलम्। ग्रासात्यान्तमुहूर्त्तायुर्नरकं याति सप्तमम्॥२९८॥ इत्यादिगदितस्तस्य,लावण्यादिगु-
णेन च। तुष्टेन सुमती राज्ञा, सर्वत्राऽस्खलितः कृतः॥२९९॥ अन्यदा देवतादिष्टदोषोदयवशादसौ। दृष्ट्वैकान्ते भूपहारं, चलचित्तस्तमग्र-
हीत्॥३००॥ सङ्गोप्य तं द्रुतं यावत्, सशङ्कस्तरलेक्षणः। प्रयातुमुद्यतस्तावद्विवेकेनाश्रितः क्षणात्॥३०१॥ अचिन्तयच्च धिगहो!, यन्मया-
करवर्त्तिनि। राज्ये सराजके विश्वनिन्दितं कर्म निर्ममे॥३०२॥ अहो! चौर्यसमं नान्यत्पृथिव्यामस्ति भीषणम्। येनाहं राजपूज्यो-
ऽपि, रङ्कादपि सभीः कृतः॥३०३॥ इति व्याहारकेणेव, विवेकेन निवर्त्तितः। हारं मुक्त्वा यथास्थाने, स्तेयवृत्तिमपाकृत॥३०४॥
अथ लावण्यपुण्याङ्गो, राज्ञीभिः सस्पृहं सदा। वीक्ष्यमाणोऽन्यदा राज्यपत्न्या स्नेहेन भाषितः॥३०५॥ सुमतिः कुमतीभूय, तत्र गन्तुं
प्रवृत्तवान्। यावत्तावद्विवेकेन, बन्धुनेव निबोधितः॥३०६॥ अहहा! मे महामोहो, भोगसौस्थ्योऽपि यद्विभोः। प्रेयस्यां मातृकल्पायां,
सविकारं मनोऽजनि॥३०७॥ परस्त्रीसङ्गिनोऽमुत्र, नरकोऽत्र शिरच्छिदा। अयशश्च यथाऽहल्यासङ्गिनः स्वःपतेरपि॥३०८॥ स
महात्मा महाविद्वान्, यः सदा दूरतश्चरेत्। एताभ्यः कुटिलाङ्गीभ्यो, भुजङ्गीभ्य इव त्रसन्॥३०९॥ दाक्षिण्यमपि नैतासु, श्रेयसे तदतः
परम्। परनारीसहोदर्यं, पालनीयं महाव्रतम्॥३१०॥ कदापि द्यूतकाराणां, स्थानेऽगाद् द्यूतकौतुकी। तत्र केनापि नालापि, प्रत्युतो-



P. P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्रासितः स तः ॥३११॥ किं च दुर्वचनं क्षोभं, कलिं क्रौर्यं कुदृश्यताम् । अङ्गच्छेदादिकं तेषां, वीक्ष्य बाढं व्यरज्यत ॥३१२॥ दध्यौ च यदहो ! द्यूतं, व्यसनानां धुरीक्ष्यते । तत्त्याज्यमीदृशं यस्य, प्रत्यक्षं दृश्यते फलम् ॥३१३॥ यद्वा किमुच्यतेऽमीषां, द्यूतेनेह नलादयः । अवस्थां प्रापितास्तान्तामत्र[1] स्थित्वाऽप्यलं ततः ॥३१४॥ इत्थं विवेकसाहाय्यात्तथाऽसौ सद्गुणोऽजनि । यथा धुरि सुशीलानां, दृष्टान्ते कथ्यते जनैः ॥३१५॥ सोऽन्यदा नृपमप्राक्षीद्विश्वासो देव ! नोच्यते । नृपधर्मे कथं तत्त्वे, विश्वासोऽयं मयीदृशः ? ॥३१६॥ नृपः प्रोवाच वत्स ! त्वमस्मद्वंशपुरोधसः । वरलब्धस्ततः कस्माद्विश्वासस्त्वयि नो भवेत् ? ॥३१७॥ नाथ ! तत्किं धृतो बाल्ये, गुप्तोऽस्मीति तदीरिते । नृपः प्राह विवेकस्योद्भेदं त्वयि प्रतीक्षितुम् ॥३१८॥ सदोषा अपि निर्दोषाः, कुलीना दुष्कुला अपि । विवेकेनात्र जायन्ते, दृश्यते स त्वयि स्फुटः ॥३१९॥ उक्तं च—कुलादपि वरं शीलं, वरं दारिद्र्यमामयात् । राज्यादपि वरं विद्या, तपसोऽपि वरं क्षमा ॥३२०॥ यस्य तस्य प्रसूतोऽत्र, गुणवान् पूज्यते नरः । सुवंशोऽपि धनुर्दण्डो, निर्गुणः किं करिष्यति ? ॥३२१॥ किञ्च—रूपलक्ष्मीवतां शीलमनुत्सेकः कलावताम् । प्रभविष्णोः सहिष्णुत्वमुष्णकाले हिमागमः ॥३२२॥ इत्यादि स्वस्य वृत्तान्तं, श्लाघ्यं च नृपतेर्मुखात् । स श्रुत्वाऽधोमुखस्तस्थौ, लज्जया भारितो भृशम् । ॥३२३॥ इत्येवं सद्विवेकेन, ध्वस्तदोषः सतां मतः । क्रमात् सद्धर्ममासाद्य, सुमतिः

## तृतीया सुसंसर्गोपरि प्रभाकरकथा ।

सुगतिं ययौ ॥३२४॥ सुसंसर्गस्य माहात्म्यमद्भुतं कथ्यतेऽधुना । प्रायो जगति येन स्यादपि दैवकमन्यथा ॥३२५॥ आस्तामौपाधिको दोषः, सहजोऽपि सुसङ्गतः । अपयाति यथा कर्म, जीवस्य ज्ञानसङ्गमात् ॥३२६॥ पश्य सत्सङ्गमाहात्म्यं, स्पर्शपाषाणयोगतः । लोहं

१ तान्ताम्–खेददायिनीम् ।

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

स्वर्णीभवेत्स्वर्णयोगात्काचो मणीयते ॥३२७॥ विकाराय भवत्येव, कुलजोऽपि कुसङ्गतः । जलजातोऽपि दाहाय, शङ्खो वह्निनिषेवणात् ॥३२८॥ आस्तां सचेतसां सङ्गात्, सदसत्स्यात्तरोरपि । अशोकः शोकनाशाय, कलये तु कलिद्रुमः ॥३२९॥ निःस्वोऽपि सङ्गतः साधुर्वरमृद्धोऽपि नाधमः । अश्वः कृशोऽपि शोभायै, पुष्टोऽपि न पुनः खरः ॥३३० ॥ एकमातृ-पितृत्वेऽपि, श्रूयते शुकयोर्द्वयोः । भिल्लानां च मुनीनां च, सङ्गाद् दोषगुणोदयः ॥३३१॥ सुसङ्गस्योपदेशोऽपि, लभ्यते न यथा तथा । इत्यथ लोकविख्याता, प्रभाकरकथोच्यते ॥३३२॥

अस्त्यत्र भरते वीरपुरे षट्कर्मकर्मठः । विप्रो दिवाकरो नाम, तस्य पुत्रः प्रभाकरः ॥३३३॥ स धातुं धमति द्यूते, रमते कुरुते कलिम् । स्वैरं भ्रमति सर्वत्र, निरङ्कुश इव द्विपः ॥३३४॥ पिता शिक्षयते वत्स!, किमात्मा व्यसनेऽस्यते ? । आत्मापि यदि नात्मीयस्ततः कोऽन्यो भविष्यति ? ॥३३५॥ अवगाहस्व शास्त्राणि, पिब काव्यरसामृतम् । शिक्षयस्व कला धर्मं, कुरूद्धर निजं कुलम् ॥३३६॥ यतः—वस्तूद्द्योतयते दीपः, प्रत्यक्षं निजतेजसा । निष्कलङ्कः पुनः पुत्रः, परोक्षानपि पूर्वजान् ॥३३७॥ किञ्च—धनाशा धातुवादेन, जीविताशा रसायनैः । गृहाशा पण्यनारीभिर्मतिभ्रंशत्रयं नृणाम् ॥३३८॥ इत्यादिशिक्षया स्पृष्टो, मालिन्यादिव मानसे । हसित्वाऽऽह सुतस्तात !, कः पठित्वा दिवं गतः ? ॥३३९॥ न शास्त्रेण क्षुधा याति, न च काव्यरसेन तृट् । एकमेवार्जनीयं तु, द्रविणं निष्फलाः कलाः ॥३४०॥ एवमुल्लुण्ठनैस्तस्य, विलक्षोऽसौ व्यचिन्तयत् । पुत्ररूपेण मे जज्ञे, किमिदं कुलवैशसम् ॥३४१॥ अकिञ्चनकरोऽपि स्याद् नाऽकुलीनः कुलोद्भवः । भस्मापि पावकोद्भूतं, पावित्र्यं कुरुते जने ॥३४२॥ अयं तु मत्सुतो भूत्वा, बभूव यदि निर्गुणः । ततः कथं कुशीलोऽभूत्, कर्मणः कोऽथवा बली ? ॥३४३॥ परदोषच्छिदोऽप्येके, स्वाङ्गजं दोषमक्षमाः । हर्तुमित्यत्र



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सूर्येन्दुमेधा एव निदर्शनम् ॥३४४॥ इत्युदासीनवृत्त्यैव, जन्म निर्वाह्य स द्विजः। पर्यन्ते वत्सलत्वेनाऽऽकार्य पुत्रमभाषत ॥३४५॥ वत्स ! यद्यपि ते नाऽऽस्था, मम वाक्ये तथाप्यमुम् । गृहाण श्लोकमेकं त्वं, समाधिमृत्यवे मम ॥३४६॥ कृतज्ञस्वामिसंसर्गमुत्तमस्त्रीपरिग्रहम् । कुर्वन् मित्रमलोभं च, नरो नैवावसीदति ॥३४७॥ ओमित्युक्त्वा गतो यावद्, द्यूतस्थानं प्रभाकरः। मित्रेण तावदागत्य, पितृमृत्युर्निवेदितः ॥३४८॥ विपन्नो मे पिता तत्र, क्षोभोऽत्र तु समागतः। किं कर्त्तव्यं मया सोऽपि, ध्यात्वैवं मित्रमूचिवान् ॥३४९॥ सखे ! विधाय यत्कृत्यं, त्वमेव पितरं मम। आनयाऽनेन मार्गेण, यथा पश्यामि तं दृशा ॥३५०॥ सख्या तथाकृते पश्चात्, पितृकृत्ये निवर्तिते। पित्रादिष्टं हृदि स्मृत्वा, शिक्षाश्लोकमभावयत् ॥३५१॥ पित्रा यदिदमादिष्टं, कुर्वतो मे तदन्यथा। किमु स्यादिति निर्णेतुं, परदेशं प्रतस्थिवान् ? ॥३५२॥ श्रुत्वा मार्गे व्रजन् सिंहाभिधानं ग्रामठक्कुरम् । कृतघ्नं तुच्छप्रकृतिं, स्तब्धं तुष्टस्तमाश्रयत् ॥३५३॥ तस्यैका दासिका तेन, विहिता गृहीणी गृहे । अज्ञानभावतो रूक्षात्मिका सर्वाधमा च या ॥३५४॥ तथा तत्रैव वास्तव्यो, निर्दाक्षिण्यशिरोमणिः । अर्थैकलुब्धो मित्रत्वे, लोभनन्दिर्वणिक् कृतः ॥३५५॥ आकारितोऽन्यदा राज्ञा, सिंहस्तेन समं ययौ । प्रभाकरो नृपं विद्वत्प्रियं ज्ञात्वेदमूचिवान् ॥३५६॥ मूर्खा मूर्खैः समं सङ्गं, गावो गोभिर्मृगा मृगैः । सुधीभिः सुधियो यान्ति, समशीले हि मित्रता ॥३५७॥ दत्तं तुष्टेन राज्ञाऽस्य, बहुग्रामयुतं पुरम् । सोऽपि दापितवान् सिंहस्वामिने जीवनं नृपात् ॥३५८॥ ग्रामेशोऽपि कृतस्तेन, सिंहो देशाधिपो द्रुतम् । अन्यान्यप्यस्य कार्याणि, दुष्कराण्यपि सोऽकरोत् ॥३५९॥ लोभनन्देरपि स्वामी, तथा तेनानुकूलितः । यथा निःस्वोप्यसौ जज्ञे, महर्द्धिभरभासुरः ॥३६०॥ अथ सिंहस्य पुत्रादप्यधिकोऽस्ति मयूरकः। उत्सङ्गलालितो नित्यं, पोषितो भूषितश्च यः ॥३६१॥ अभूत् तस्याऽऽमिषे तस्या, दास्या गर्भानुभावतः । दोहदस्तेन सोऽपूरि, तत्तुल्याऽन्यमयूरतः ॥३६२॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ठक्कुरस्य मयूरस्तु, क्वापि यत्नादगोप्यत । एवं महोपकाराणि, तेन सर्वाणि चक्रिरे ॥३६३॥ अथ भोजनवेलायां, ठक्कुरस्तं मयूरकम् अदृष्ट्वा मानुषान् प्रेष्य, वीक्षयामास सर्वतः ॥३६४॥ यावन्न क्वापि लब्धोऽसौ, तावदाकुलितो भृशम् । स उच्चैः कारयामास, पटहाऽऽघोषणामिमाम् ॥३६५॥ मयूरं स्वामिसिंहस्य, यः कोऽपि कथयिष्यति । दीनाराष्टशतं लब्धा, सोऽभयं च न संशयः॥३६६॥ तच्छ्रुत्वा चिन्तितं दास्याऽनेन वैदेशिकेन किम् । गृह्णामि द्रविणं भर्त्रा, ममान्योऽपि भविष्यति ॥३६७॥ इति सा पटहं स्पृष्ट्वा, गत्वा सिंहान्तिकेऽवदत् । शृणु देव ! पुरो भर्तुः, कथनीयं यथातथम् ॥३६८॥ निशि मे दोहदो जज्ञे, मयूरामिषभक्षणे । प्रभाकरेण कुत्रापि, स तु नासादितोऽपरः ॥३६९॥ वारयन्त्यामपि मयि, ततः स्नेहातिरेकतः । वराकस्त्वत्य एवायं, शिखी हत्वा ममार्पितः ॥३७०॥ अत्यासङ्गविनष्टोऽयमरे ! किं कृतवानिति ? । रुष्टः सिंहो भटान् प्रेषीन्निग्रहीतुं प्रभाकरम् ॥३७१॥ सोऽपि मित्र-परीक्षार्थं, लोभनन्दिगृहं गतः । उवाच कम्पमानाङ्गो, मित्र ! भो रक्ष रक्ष माम् ॥३७२॥ लोभनन्दिस्तमप्राक्षीत्, किं त्वया भो ! विनाशितम् ? । स उवाच कलत्रार्थे स्वामिबर्ही हतो मया ॥३७३॥ ततो मित्राधमः प्राह, स्वामिद्रोहविधायिनः । स्थानं नास्त्यत्र कः पूलं, ज्वलन्तं स्वगृहे क्षिपेत् ? ॥३७४॥ एवं वदन्तमप्येनं, क्षिप्त्वा यावत्प्रभाकरः । प्रविवेश गृहं तावत्, पूच्चक्रे लोभनन्दिना ॥३७५॥ आगताश्च भटास्तैः स, बद्ध्वाऽऽनीतो बहिस्ततः । निग्रहायोद्यतास्तेन, सदैन्यमिति भाषिताः ॥३७६॥ बान्धवाः ! न मया कोऽप्युपकारो वः कृतः परम् । अप्रियं यदि नो चक्रे, तदा मां रक्षतैकदा ॥३७७॥ किं वा नयत मां तत्र, यथा विज्ञपये प्रभुम् । इत्युक्ते तैः स सिंहान्ते, नीतः सकरुणं जगौ ॥३७८॥ देव ! त्वं मे पिता स्वामी, शरणं त्वं च सर्वथा । क्षमस्वैकं



---

१ त्वदीयः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

व्यलीकं यद्, गुरवो न गुरुक्रुधः ॥३७९॥ तत् श्रुत्वा भ्रकुटीभङ्गभीषणः सिंह उक्तवान्। अरेऽर्प्पय मयूरं वा, स्मर वाऽभीष्टदैवतम् ॥३८०॥ तदा च तस्य दुःखेन, जनोऽभूदाकुलोऽखिलः। विना मित्रकलत्राभ्यां, ते हि दर्शितविक्रिये ॥३८१॥ स ऊचे दैवतप्रायं, पितुरेव वचः स्मृतम्। यदतिक्रमणे सद्यो, ममाभूदीदृशं फलम् ॥३८२॥ इति श्लोकं पठित्वाऽसौ, तं मयूरं यथास्थितम्। समर्प्य सिंहमापृच्छ्य, प्रसन्नास्यस्ततोऽचलत् ॥३८३॥ सर्वलक्षं स सिंहेन, बोधितोऽपि न संस्थितः। प्रत्यक्षदृष्टदोषाणां, करोत्यनुनयः किमुम्? ॥३८४॥ गच्छंश्च चिन्तयामास, धिगेषां दुष्टचेष्टितम्। किम्पाकवृक्षच्छायेव, दुरन्ता खलसङ्गतिः ॥३८५॥ भस्मनि हुतमिवामीषु, तत्तथोपकृतं मया। सर्वमेकपदे नष्टं, भव्यं वा जीवितोऽस्मि यत् ॥३८६॥ नृणां मृत्युरपि श्रेयान्, पण्डितेन सह ध्रुवम्। न राज्यमपि मूर्खेण, लोकद्वयविनाशिना ॥३८७॥ किञ्च—शिरसा सुमनःसङ्गाद् धार्यन्ते तन्तवोऽपि हि। तेऽपि पादेन मृद्यन्ते, पटेषु मलसङ्गताः ॥३८८॥ स्वामि-मित्र-कलत्राणामधमानां परीक्षणम्। कृतं तावदिदानीं तु, करिष्यामि पितुर्वचः ॥३८९॥ इति गच्छंस्ततः प्राप, सुन्दरं नगरं क्रमात्। तत्र हेमरथो राजा, तत्पुत्रो गुणसुन्दरः ॥३९०॥ त्यक्तकुव्यसनासङ्गः, कृतज्ञः कोविदप्रियः। जनानुरागसुभगो, लघीयानपि विश्रुतः ॥३९१॥ बहिः खल्लूरिकायां तं, शास्त्राभ्यासरतं सदा। दृष्ट्वा हृष्टोऽन्तिके गत्वा, चोपतस्थे प्रभाकरः ॥३९२॥ कुमारोऽपि तमालप्य, श्रमान्ते स्वच्छया गिरा। भोज्यागमे स्वहस्तेन, भोजयामास गौरवात् ॥३९३॥ यतः—प्रसन्ना दृग् मनः शुद्धं, ललिता वाग् नतं शिरः। सहसाऽर्थिष्वियं पूजा, विनापि विभवं सताम् ॥३९४॥ पप्रच्छ च कुमारस्तं, मित्र! कस्ते मनोरथः?। सोऽप्युवाच महाभाग!, तवाऽवस्थातुमन्तिके ॥३९५॥ तर्हि स्वस्थमनास्तिष्ठेत्युक्ते नृपतिसूनुना। तस्थौ प्रभाकरस्तत्र, हृष्टो दध्यौ स्वचेतसि ॥३९६॥ अस्याऽहो! विशदा मूर्त्तिर्मितं च मधुरं वचः। नव्यमौचित्यचातुर्यं, कटरे! स्वच्छतात्मनः ॥३९७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कथाचतुष्टयी ॥१२॥

सुसंसर्गोपरि प्रभाकर-कथा ।

बाल्येऽपि मधुराः केऽपि, द्राक्षावत् केऽपि चूतवत् । विपाकेन कदापीन्द्रवारुणीफलवत्परे ॥३९८॥ आकृतौ हि गुणा नूनं, सत्यीभूतमिदं वचः । अमुष्य दर्शनेनापि, सफलो मे श्रमोऽजनि ॥३९९॥ तदस्य सेवया प्राच्यमघं कुस्वामिसङ्गजम् । अधुना क्षालयिष्यामीति निश्चित्य तथाऽकरोत् ॥४००॥ उत्तमप्रकृतिः स्थैर्य-गाम्भीर्य-विनयान्विता । श्रीरभूद् गृहिणी तस्य, कुमारार्पितवेश्मनः ॥४०१॥महेभ्यः स्वजनाधारः, परोपकरणे रतः । पौरमुख्यो वसन्ताख्यस्तस्य मित्रमजायत ॥४०२॥ विपन्ने राज्ञि कालेऽथ, राजाऽभूद् गुणसुन्दरः । प्रभाकरः पुनर्मन्त्री, सर्वकार्येषु यत्कृती ॥४०३॥ अन्यदा शासतस्तस्य, प्रजा नीत्या प्रजापतेः । ढौकनीये कृतौ हेडावित्तर्जात्यतुरङ्गमौ ॥४०४॥ सल्लक्षणधरौ किन्तु, वैपरीत्येन शिक्षितौ । तत्स्वरूपमजानानस्तावत्पर्याणयन्नृपः ॥४०५॥ एकस्मिन् स्वयमारूढो, द्वितीयेऽमात्यमादिशत् । जग्मतुः सपरिवारौ, शनकैस्तौ पुराद् बहिः ॥४०६॥ वाहयित्वा क्षणं वाहौ, वाह्याल्यां वेगमीक्षितुम् । कशाघातं नृपामात्यौ, कर्कशं चक्रतुस्तयोः ॥४०७॥ सहसोत्प्लुत्य तौ तस्मादलिदष्टौ कपी इव । प्रवृत्तौ वेगतो गन्तुं, प्रमातुमिव मेदिनीम् ॥४०८॥ यात यात द्रुतं भृत्याः !, शीघ्रं धावत सादिनः । दिव्येनैवैष केनापि, हयेन ह्रियते नृपः ॥४०९॥ पूत्कुर्वतो जनस्यैवं, धावतामपि सादिनाम् । पापान्निधिरिवाद्दष्टः, सामात्योऽभून्नृपः क्षणात् ॥४१०॥ यथा यथा नृपा-ऽमात्यौ, वल्गामाकर्षतो हठात् । तथा तथा चटद्वेगं गच्छतस्तौ तुरङ्गमौ ॥४११॥ सम्प्राप्तयोर्महाटव्यामामलक्यास्तरोरधः । गच्छतैव करेणात्तं मन्त्रिणाऽऽमलकत्रयम् ॥४१२॥ अतिदूरं गतौ यावद्विलक्षीभूय तौ श्रमात् । वल्गां मुमुचतुस्तावदश्वौ तत्रैव संस्थितौ ॥४१३॥ उत्तीर्णौ च नृपामात्यौ, प्राणैर्मुक्तौ च वाजिनौ । किमेताभ्यां निजस्वामिद्रोहकाभ्यामितीव तौ ? ॥४१४॥ तयोः खेदं क्षणं धृत्वा, परदुःखाद् दुःखी नृपः । क्षुत्तृष्णापीडितो बाढं, मनस्येवं व्यभावयत् ॥४१५॥ पृथिव्यां त्रीणि रत्नानि, जलमन्नं सुभाषितम् । मूढैरुपलखण्डेषु रत्नसंज्ञा

॥१२॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ऽभिधीयते ॥४१६॥ ध्रुवं सत्यमिदं वाक्यं, यत्पर्याणे तनौ च मे। सत्स्वप्येतेषु रत्नेषु, तृष्णा शाम्यति नाधुना ॥४१७॥ उवाच च महामात्य !, तृषा यान्ति ममाऽसवः। मन्त्युवाचाऽऽकुलो देव !, मा भू रक्षामि ते तृषाम् ॥४१८॥ एकमामलकं मन्त्री, ददौ त्रिभ्यो महीभुजे। निर्वृत्तात्मा तदाहारात्, तस्थौ स्वस्थः क्षणं नृपः ॥४१९॥ भूयस्तापार्दितः प्राह, मित्र ! पृष्टोऽसि सम्प्रति। तथा मां बाधते तृष्णा, यथा नूनं न जीव्यते ॥४२०॥ इति मूर्च्छां गतो भूमौ, पतन् धृत्वाऽऽशु मन्त्रिणा। द्वितीयामलकं दत्त्वा, पुनः सज्जीकृतो नृपः ॥४२१॥ एवं तृतीयवेलायामप्यामलकमर्पितम्। पदानुलग्नं दैवाच्च, पृष्ठे सैन्यमथागमत् ॥४२२॥ अग्रेसराश्ववारैस्तौ दृष्ट्वा चक्रे जयध्वनिः। मन्त्रिणोचे भटास्तावद्, नीरमानीयतां द्रुतम् ॥४२३॥ ततो व्याघुट्य तैः सैन्यं, वर्द्धाप्याऽऽनीय तत्र च। जलाऽन्नाहारसन्तुष्टः, सद्यश्चक्रे महीपतिः ॥४२४॥ राजाऽथ सपरिवारो, जगाम नगरं निजम्। पुनर्जन्मोत्सवं राज्ञश्चक्रुः सामन्त-नागराः ॥४२५॥ अथ राज्ञः सुतः पञ्चवर्षीयो मन्त्रिमन्दिरम्। क्रीडार्थं नित्यमायाति बालहारेण संयुतः ॥४२६॥ सुखाम्यादि-परीक्षार्थमथ मन्त्री तमन्यदा। एकान्ते गोपयामास, सान्नपानं सयामिकम् ॥४२७॥ कुमारो नेक्ष्यते क्वापि, निशम्यैवं वचो नृपः। सर्वत्रालोकयामासाऽत्याकुलः प्रेष्य पूरुषान् ॥४२८॥ यावन्न क्वापि लब्धोऽसौ, तावद् घूर्णितमानसः। शोकपङ्काविलो राजाऽधोमुखी-भूय तस्थिवान् ॥४२९॥ दध्यौ च किमिदं हन्त !, कुमारो मन्त्री मन्दिरम्। गतो न दृश्यते कुत्राप्यसम्भाव्यमदोऽखिलम् ॥४३०॥ राजलोकः समग्रोऽपि, दुःखकृष्णमुखो नृपम्। आसनस्थं समभ्येति मुक्त्वा मन्त्री प्रभाकरम् ॥४३१॥ अत्रान्तरे मन्त्रिपत्नी पतिं प्रपच्छ नाथ ! किम्। नाऽद्य राजकुले यातः, सदुःखमिव सोऽब्रवीत् ॥४३२॥ प्रिये ! दर्शयितुं नात्ममुखं शक्नोमि भूपतेः। यन्मया तादृशो जघ्ने, कुमारो हतबुद्धिना ॥४३३॥ सम्भ्रान्ता सा जगौ शान्तं, पापमेतत्किमुच्यते?,। पापं शान्तमशान्तं वा, परमेतन्मया कृतम्

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥४३४॥ इत्युक्ते तेन साऽवोचत् कथंकारमिदं कृतम्?। सोप्यूचे यत्त्वयातीतदिने मे कथितं पुरः ॥४३५॥ गर्भवैरानुभावेन, केनाप्येष नृपाङ्गजः। दशोर्दाहाय मे चक्रे, त्वन्मोहात् तन्मयेदृशम् ॥४३६॥ तच्छ्रुत्वा किं वृथा कार्ये, विनष्टे परिदेवनैः?। करोमि प्राप्तकालीनं, ध्यात्वैवं धीरमानसा ॥४३७॥ गत्वाऽसौ भर्तृमित्रस्य, वसन्तस्य तदाख्यत। सोऽपि भाव्यमिदं नूनं, ध्यात्वैवं धीरमब्रवीत् ॥४३८॥ अये सुन्दरि! मा भैषीर्जीवितेन धनेन च। विपदं निजमित्रस्य, रक्षाम्येव न संशयः ॥४३९॥ जातीपुष्पसमस्याऽस्य, जीवितस्य धनस्य च। मित्रार्थे यदि नाशः स्यात्, किं न प्राप्तं फलं तदा? ॥४४०॥ इत्युक्त्वा स ययौ राजकुलं नत्वा नरेश्वरम्। कृताञ्जलिर्वसन्ताख्यः, सावष्टम्भं व्यजिज्ञपत् ॥४४१॥ विकल्पं देव! मा कार्षीस्त्वत्पुत्रनिधने खलु। अहं हेतुरतो वित्तं, जीवितं च गृहाण मे ॥४४२॥ निशम्येदं नृपो यावदास्ते संशयितो हृदि। मन्त्रिपत्नी समागत्य, तावदेवं व्यजिज्ञपत् ॥४४३॥ वसन्तो मित्रदारार्थे, देव! विज्ञपयत्यदः। परं मे दोहदस्यार्थे, त्वत्पुत्रस्य वधोऽजनि ॥४४४॥ इति किंकृत्यतामूढो, नृपः शून्य इवाभवत्। ततो मन्त्री समागत्य, कम्पमान इवावदत् ॥४४५॥ मदीयपीडया देव!, मित्र-पत्न्याविमे मम। स्वं निवेदयतो नूनमपराधोऽत्र नैतयोः ॥४४६॥ आसन्नविपदा किन्तु जातदुर्मतिना मया। कुमारो निहतो नाथ!, योग्य दण्डं कुरुष्व मे ॥४४७॥ अग्रेऽपि मन्त्रिशङ्काऽऽसीत्तत्रार्थे भूभुजो हृदि। तन्निशम्य पुनर्बाढं, प्रत्ययोऽजनि निश्चलः ॥४४८॥ ततः स्पष्टमुखो वीक्ष्य, मन्त्रिणं नृपतिर्जगौ। येन मे जीवितं दत्तं, को दण्डस्तस्य युज्यते? ॥४४९॥ मित्र! त्वं यदि नाऽदास्यस्तदा धात्रीफलानि मे। तदा क्वाहं क्व राज्यं च, क्व सुतः क्व परिच्छदः? ॥४५०॥ मन्त्र्याह सुप्रभो! जज्ञे, कृतज्ञत्वं तवेयता। कार्य एव पुनर्दण्डः, पुत्ररत्नापहस्य मे ॥४५१॥ एकमामलकं तर्हि, वलितं त्रयमध्यतः। इत्युक्ते भूभुजा मन्त्री, जगौ प्रीतिसगद्गदम् ॥४५२॥ देव! सर्वगुणाधार! जगतीमौलिमण्डन!। यद्येवं ते कृतज्ञत्वं, तदास्त्वामलकत्रयी



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥४५३॥ चिरं कुरु कुमारेण, सहितो राज्यमक्षतम्। इत्युक्त्वाऽनाययत्तत्र, पुत्रं प्रेष्य निजान् नरान् ॥४५४॥ भूषिताङ्गं स्मितमुखं, ललमानं तथैव तम्। सुतं दृष्ट्वा नृपो हर्षं, विस्मयं च परं ययौ ॥४५५॥ किमेतदिति राज्ञोक्ते, मन्त्री लोकसमक्षतः। वृत्तान्तं पितुरादेशादारभ्याखिलमाख्यत॥४५६॥ तन्निशम्य भृशं राजा, लज्जितः सत्स्वभावतः। मन्त्रिणं च करे कृत्वा, सप्रणयमिवाब्रवीत् ॥४५७॥ अमूल्याऽऽमलकं यत् ते, पुत्रतुल्यं कृतं मया। मर्षणीयोऽपराधोऽयं, त्वया मित्र ! महानिति ॥४५८॥ इत्यसौ लब्धसुस्वामि-सुकलत्र-सुमित्रजम् । अन्वभूत्सुखमैकात्म्यमापन्नो भूभुजा सह ॥४५९॥ तौ भूप-सचिवौ राज्यं, भुक्त्वा सत्सङ्गतत्परौ। सद्गुरोर्धर्ममासाद्य, हितोद्युक्तौ बभूवतुः ॥४६०॥ सुसंसर्गस्य माहात्म्यं, व्यवहारेण कीर्त्तितम्। सर्वार्थसिद्धिकृत्सत्त्वविषयं वर्ण्यतेऽधुना ॥४६१॥

## चतुर्थी सत्त्वोपरि हरिश्चन्द्रनृपकथा ।

श्रियो नाशं यान्तु व्रजतु निधनं गोत्रमखिलं, शिरश्छेदो वाऽस्तु प्रभवतु समन्ताच्च विपदः। विवेकार्कज्योतिर्विघटितमहामोहतमसः, प्रतिज्ञातादर्थात् तदपि न चलत्येव कृतिनः ॥४६२॥ सत्त्वमेव नृणां तत्त्वं, सत्त्वं सिद्ध्यै भवद्वये। विना सत्त्वं स जीवोऽपि, निर्जीव इति कथ्यते ॥४६३॥ विशीर्णोऽपि यथा वृक्षः, सति मूले प्ररोहति। प्रक्षीणोऽपि तथा भूयो, नरः सत्त्वाद्विवर्धते॥४६४॥ यद् दूरं यद् दुराराध्यं, दुर्घटं दुर्लभं च यत्। सर्वं सिध्यति तत् सत्त्वात्, तद्विना तु सदप्यसत्॥४६५॥ श्रूयते हि पुरा लोके, श्रीमदीक्ष्वाकुवंशभूः। उदारचरितः सत्त्वे, हरिश्चन्द्रो महानृपः ॥४६६॥

तथाहि—अस्त्यत्र भरतेऽयोध्या, पुरी वप्रांशुकोज्ज्वला। प्रासादमण्डना नाऽन्यैरभिभूता सतीव या ॥४६७॥ सूर्यवंशभवक्ष्मापवृत्तोज्ज्वलयशःश्रिया। जातच्छत्रा महैश्वर्यं, दधाति नगरीषु या ॥४६८॥ नतिरेवोन्नतिर्येषां,दानमेव धनार्जनम्। परार्थं एव तु स्वार्थः,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्षमैव हि समर्थता ॥४६९॥ एवंविधनरोत्तंसैर्वृक्षैरुद्यानभूरिव । या सदालङ्कृता हर्षं, न केषां कुरुतेतराम् ? ॥४७०॥ युग्मम् ॥ एकनक्षत्रमालेन्दु, स्त्रीणां हारमुखेन्दुभिः । प्रतिबिम्बच्छलाद् व्योम, यया सौधेष्वधःकृतम् ॥४७१॥ बभूव नृपतिस्तस्यां, हरिश्चन्द्रो महाभुजः । धर्मेणोद्वाहिता कीर्त्तिर्येनर्त्ते करपीडनम् ॥४७२॥ तथा नीतिगवी तेन, पोषिता सुकृतात्मना । विश्वप्रीत्यै यथाऽद्योपि, यशोदुग्धं तदुद्भवम् ॥४७३॥ अन्यदा रात्रिपर्यन्ते, पल्यङ्कस्थः स बन्दिना । पठ्यमानमिमं श्लोकं, सत्त्वोत्तेजनमाश्रृणोत् ॥४७४॥ विपद्यपि गतः सत्त्वाद्, ध्रुवं स्यात् सम्पदां पदम् । गतोऽप्यस्तं रविर्मार्गादच्युतोऽभ्युदयी पुनः ॥४७५॥ इमं श्रुत्वा पठन्नेव, समुत्तस्थौ महीपतिः । पुनः पुनस्तदीयार्थं, मुदा हृदि विभावयन् ॥४७६॥ कृत्वा प्राभातिकं राजा, यावदास्थानमाययौ । तावत् कोऽपि नरोऽभ्येत्य, सम्भ्रान्त इदमूचिवान् ॥४७७॥ महाराज ! हरिश्चन्द्र ! त्वयि शासति मेदनीम् । न श्रुतावपि लोकानां, भयमित्यक्षरद्वयम् ॥४७८॥ किन्त्वेकः शूकरः शक्रावतारवनमध्यगान् । कुतोऽप्यागत्य भीष्माङ्गो, भञ्जन्नास्ते लताद्रुमान् ॥४७९॥ तापसाश्राभवंस्तत्र, सव भयविसंस्थुलाः । ततो दध्यौ नृपोऽमीषां, किमभूद् हा ! तपस्विनाम् ? ॥४८०॥ यथा लोकः करं दत्ते, स्वधनस्याऽवनिपतेः । मुनयोऽपि तथा धर्मषष्ठभागमिति श्रुतिः ॥४८१॥ ततो रक्ष्या मयैवेते, ध्यात्वेत्युत्थाय सम्भ्रमात् । अब्रवीदहहा ! कोऽयं, मयि सत्यप्युपप्लवः ॥४८२॥ श्रीमन्नाभेयदेवस्याऽऽरामशत्रुं मुनिद्रुहम् । तमद्य शूकरं हन्मि, प्रतिज्ञां चाऽकरोदिति ॥४८३॥ अथो यथागतं क्वापि, वराहवेदके गते । प्रतिश्रवमिव प्रोच्चैः, राजाऽऽरोहत् तुरङ्गमम् ॥४८४॥ सैन्यं सन्नह्यदेवाऽसौ, विमुच्य स्वयमेव तम् । निग्रहीतुमनाः क्रोडं, त्वरीतं निर्ययौ पुरातु ॥४८५॥ मनोवेगेन यात्यश्वे, भूपतिः प्राप तत्क्षणात् । वनं शक्रावताराख्यं, मुदेवाऽभिमुखागतम् ।४८६॥ अपश्यत् स्मेराब्जमुखीं, कलहंसकमण्डिताम् । मृदुवीचीभुजां तत्र, शरयूमुदधिप्रियाम् ॥४८७॥ राजा पप्रच्छ



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पार्श्वस्थौ, स कपिञ्जल-कुन्तला । अहो ! क्वाऽसौ वराहस्तावूचतुर्नन्वयं पुरः ? ॥४८८॥ वराहस्तद्वचः श्रुत्वा, घुर्घुराऽऽरवमुच्चकैः । कुर्वाणोऽपि नृप क्रोधाद्, दधावे वनगह्वरात् ॥४८९॥ लघुहस्तस्ततो राजा, जानुलम्बभुजोऽपि हि । रोमाञ्चकवचं बिभ्रद्, निर्भयोऽपि भृशं तनौ ॥४९०॥ करे चापमलङ्कृत्य, पूरयंस्तद्वपुः शरैः । वराहं पातयामास, पूरयामास संभ्रवम् ।॥४९१॥ [युग्मम्] ततः कपिञ्जलं प्राह, राजा पश्याऽग्रतः कियत् । लक्ष्मेतच्चलं भिन्नं ?, सोऽप्युपेत्य तथाऽकरोत् ॥४९२॥ स्वेनैत्य पश्य मित्रेति, प्रोक्तस्तेन नृपो द्रुतम् । ददर्श रुधिरार्द्रं तं, ज्वलद्दवमिवाचलम् ॥४९३॥ उवाच च यथास्यैवमतैरिश्चीयमाकृतिः । तथा मन्ये वराहेण, भाव्यं दिव्येन केनचित् ॥४९४॥ कपिञ्जलोऽवदद् देव !, द्वीपी चायं हतः पुरा । राजाऽऽह पुनरयं किं ?, विलोक्याह कपिञ्जलः ॥४९५॥ इदमज्ञातमेवाऽस्तु, राजा प्राह तथापि किम् ? । कुन्तलोऽप्याह किं ज्ञातेनाऽमुना देव ! चल्यताम् ॥४९६॥ उपसृत्य स्वयं राजा, लुठद्‌गर्भां मृगीं हताम् । वीक्ष्य प्राह विषण्णः सन्नकृत्याचरणं हहा ! ॥४९७॥ न्यायः कोऽयमशस्त्रो यद्, दधानो वदने तृणम् । इत्थं निःशरणो दीनो, हन्यते सुभटैः पशुः ? ॥४९८॥ धिग् धिङ् मां हरिणीभ्रूणघातकं गुरुपातकम् । धिगिमा मेऽखिलक्षोणीकरात्तिजनिताः श्रियः ॥४९९॥ विकलाक्षत्वकृत् पञ्चेन्द्रियाणामपि या नृणाम् । कृत्याकृत्यमतिं या च, मदिरेव विलुम्पति ॥५००॥ कुलटेव न यैकत्राऽवस्थाना तामपि श्रियम् । इच्छवो मार्गमुज्झन्ति, मुनिभिः श्लाघितं जडाः ॥५०१॥ धन्यास्ते मुनयो हित्वा, महासंसारकश्मलम् । निष्पङ्के संवृतात्मानो, मोक्षमार्गे चरन्ति ये ॥५०२॥ तद् गच्छाम्याश्रमं पुण्यं, यत्र सन्ति तपोधनाः । इयतः कल्मषात् शुद्धिः, कथं मे भविताऽन्यथा ? ॥५०३॥ इति राज्याद् विरक्तात्मा, पादचारेण भूपतिः । व्रजित्वा सह मित्राभ्यां, विवेश द्रुतमाश्रमम् ॥५०४॥ दृष्ट्वा कुलपतिं तत्र, ननाम मुदितो नृपः । पृष्ठे पाणिं निधायास्य, मुनिरप्याशिषं ददौ ॥५०५॥ क्षतात् त्राणेन लोकानां,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वस्य क्षत्र इति प्रथाम् । कुर्वाणः सार्थिकां पुण्यैः, प्रवर्धस्व सदा नृप ! ॥५०६॥ राजा पप्रच्छ भगवन् !, ज्ञान-ध्यान-तपांसि वः । निर्वहन्त्यहतं कच्चित्, कुशलं मृगभूरुहाम् ॥५०७॥ मुनिरूचे महाराज !, भरतान्वयभूषण !। त्वयि प्रशासति क्षोणीं, कुतोऽस्माकमुपद्रवः ? ॥५०८॥ मही राजन्वती तेजः, प्रबलं विमलं यशः । वर्णाश्रम! महीरक्षा, दक्षा वृत्तिस्तवाऽखिला ॥५०९॥ अस्मिन्नवसरे क्वाऽपि, जातः कोलाहलो महान् । किमेतदिति सम्भ्रान्तौ, मुनि-भूपौ बभूवतुः ? ॥५१०॥ अब्रह्मण्यमब्रह्मण्यमिति च व्याकुलं वचः । श्रुत्वा कुलपतिः शिष्यं, तं ज्ञातुं प्राहिणोद् द्रुतम् ॥५११॥ पुनरार्तस्वरो जज्ञे, स्त्रीणां शोकस्पृशामिति । मातश्चेद् मे मृगी मर्ता, करिष्येऽनशनं तदा ॥५१२॥ माताऽपि प्राह चेद् वत्सेऽनशनं त्वं करिष्यसि । तदाहमपि कर्तास्मि, विना त्वां जीवितेन किम् ? ॥५१३॥ श्रुत्वा कुलपतिश्चैतद्, हृदयं स्फोटयद् वचः । किं नः प्राणप्रिया पुत्री, वञ्चनाऽनशनीयति ? ॥५१४॥ इयं च निकृतिर्नूनमस्मत्सधर्मचारिणी । वत्सामनुसरन्त्येतद्, ब्रूते किमसमञ्जसम् ? ॥५१५॥ ततोऽङ्गारमुखादाशु, स तापस्यावजूहवत् । आजग्मतुरथो तारं, ते रुदत्यावुभे अपि ॥५१६॥ उवाच वञ्चनां मायी, मुनिः किं पुत्रि ! रोदिषि ? । साऽऽह जानाति तातो यदस्ति क्रीडामृगी मम ॥५१७॥ सोऽप्याह या त्वया बाल्यात्, पोषिता स्वकरार्पितैः । नीवारकवलैस्तस्यास्ततः किमभवत् सुते ! ? ॥५१८॥ इत्युक्ते वञ्चना तारस्वरं रोदिति केवलम् । ततः प्रविश्य सम्भ्रान्तः, शिष्यः कुलपतिं जगौ ॥५१९॥ भूरराजन्वती सेयमब्रह्मण्यमहो ! महत् । मृगयाव्यसनात् पापः, कोऽप्यहन् गर्भिणीं मृगीम् ॥५२०॥ सास्रं कुलपतिः प्रोचे, हहा ! किं भाव्यतः परम् ? । यतस्तां निघ्नता तेनाऽऽनीतोऽस्माकं कुलक्षयः ॥५२१॥ विना मृगीं कथं जीवेद्, वत्सा तज्जीविता ततः । न प्राणिति विना पुत्रीमस्मत्प्राणप्रिया खलु ॥५२२॥ विना सधर्मचारिण्या, कुतो मे तपसां विधिः ?। तपोविधिं विना मे स्याद्, ऋषित्वमनघं नहि ॥५२३॥ राजन्निक्ष्वाकुराजेन्द्र !, कौतस्त्योऽयं



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तपस्विनाम् । इत्थमाकस्मिकः शोकशङ्कुस्त्वय्यपि भूपतौ ? ॥५२४॥ ततः कुतोऽपि तं ज्ञात्वा, साधुबाधाकरं परम् । श्वपाकं शाधि येन त्वं, लोकपालोऽसि पञ्चमः ॥५२५॥ वञ्चना त्वाह मां तात !, चितामारोढुमादिश । किं न वेत्सि मर्मैण्या हि, मरणं क्रकचायते ? ॥५२६॥ सविषादं नृपः प्रोचे, मुने ! कुर्वेऽहमत्र किम् । परेषां दण्डमाधातुमलमेषोऽस्मि नात्मनः ? ॥५२७॥ ससंरम्भं च सौत्सुक्यं, मुनिः प्रोवाच नन्वहो ! । इयता स्यात् किमुक्तं यद्, मया व्यापादिता मृगी ? ॥५२८॥ पश्चात्तापात् स्वमात्मानं, प्रणिन्दति महीपतौ । पिधाय वल्कलेनास्यं, पूच्चक्रेऽथ स मायिकः ॥५२९॥ ऊचे च कुपितो भूपमाः !पाप! वहसि ध्रुवम् । कोदण्ड-शरधी हन्तुं, ध्यानलीनांस्तपस्विनः ? ॥५३०॥ निपत्य पादयो राजा, विनयाद् मुनिमब्रवीत् । तमेकमपराधं मे, क्षमस्व त्वं क्षमानिधे ! ॥५३१॥ मुनिः पराङ्मुखो भूत्वा, चुक्रोश नृपमुच्चकैः । भरतान्वयचन्द्राङ्क !, व्रज व्रज ममाश्रमात् ॥६३२॥ युष्मादृशां निर्घृणानां, श्रुता वागपि पाप्मने । किं पुनः कर्मचण्डाल !, वाचाल ! सङ्गमस्त्वया ॥५३३॥ राजा सविनयं प्राह, मुने ! ब्रूहि करोमि किम् ? । विशाम्यग्निं त्यजामि क्ष्मां, चरामि व्रतमेव वा ॥५३४॥ सकोपं मुनिरप्यूचेऽद्यापि श्रावयसे गिरम् । मायाविन् ! हरिणीभ्रूणघातपातकपङ्किलाम् ? ॥५३५॥ ततोऽङ्गारमुखोऽवादीत्, प्रसादं कुरु मा रुषः । तपस्तेजोनिधे ! नायमपमानं नृपोऽर्हति ॥५३६॥ किन्तु दुष्कर्मणोऽमुष्य, पवित्रीकारकारणम् । शास्त्रानुपाति यत् किञ्चित्, तदेवाऽऽशु समादिश ॥५३७॥ मुनिरूचेऽङ्गारमुख !, शुद्धिरस्य तदा भवेत् । सर्वस्वं यद्यसौ दत्ते, दानं ह्यघनिवृत्तये ॥५३८॥ सोच्छ्वासं नृपतिः प्रोचे, प्रसीद भगवन् ! मयि । सर्वस्वं मे गृहाण त्वं, विलयं यात्वघं मम ॥५३९॥ किं न प्राप्तं मया त्रातः !, शुध्यामि यद् यतस्ततः । सग्रामाऽश्वेभकोशा भूर्दत्ता तेऽम्बुधिमेखला ॥५४०॥ प्रणम्य मुनिमङ्गारमुखः प्राह कृताञ्जलिः । राजा यदभिधत्ते तद्, भगवन् ! प्रतिपद्यताम् ॥५४१॥ अथाऽपसार्य राजानमूचतुः सुहृदौ मृदु । अ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

काण्डे कोऽयमुत्पातो, राजन् ! विमृश मा मुहः ? ॥५४२॥ राजाऽवज्ञाय तद्वाचमूचे सप्रश्रयं मुनिम्। यदुक्तं भगवन्नस्तु, गृहाण वसुधामिमाम् ॥५४३॥ क्षामाक्षरं मुनिः प्राह, दत्ताऽस्मभ्यं मही त्वया। नार्हस्यतः परं पृथ्व्या, भोगमामिति सोऽब्रवीत् ॥५४४॥ तदा तत्रागतं वाराणसीतः शिष्यमात्मनः। मुनिं कौटिल्यनामानमाजूहवत् स तापसः ॥५४५॥ हरिश्चन्द्रेण मे पृथ्वी, दत्ता जलधिमेखला। इत्यर्थे खलु साक्षी त्वमिति तं मुनिरादिशत् ॥५४६॥ कौटिल्योऽप्यवदद् राजन्नत्रार्थे साक्षिणो वयम्। ओमित्युक्ते नृपेणाऽगात्, स स्वं स्थानं मुदा नृपः ॥५४७॥ अथ व्यजिज्ञपत् कोऽपि, शिष्यो यावदियं मृगी। तिष्ठेत् तावद् विपन्ना न, पाठस्तत् क्रियतां किमु ? ॥५४८॥ सखेदं मुनिरूचेऽस्याः, कारयाऽनलसंस्कृतिम्। वञ्चनाऽऽह मया सार्धमस्याः स्यादग्निसंस्कृतिः ॥५४९॥ राजा तां विनयादूचे, ममैकं दुर्नयं सह। अहं तुभ्यं प्रदास्यामि, स्वर्णलक्षमसंशयम् ॥५५०॥ कष्टाद्दिव तयाऽप्योमियु क्ते माह मुनिस्ततः। दीयतां तर्हि हेमाऽस्यै, राजा प्राहैत मत्पुरे ॥५५१॥ प्रातः सन्ध्याविधिं कृत्वा, पश्यैते वयमागता इत्याकर्ण्य मुनिं राजाऽवोचत् तर्ह्यधुना वयम् ॥५५२॥ इक्ष्वाकुवंशभूपालगुरुं श्रीनाभिसम्भवम्। देवं शक्रावतारस्थमर्चित्वा याम धामनि ॥५५३॥ [युग्मम्] एवं कृत्वा च पाश्चात्याऽऽगतसैन्येन संयुतः। हरिश्चन्द्रनृपोऽयोध्यां, प्रविवेश दिनात्यये ॥५५४॥ अथ राज्यमहास्तम्भः, सर्वनीतिविशारदः। मन्त्री मित्रं च तस्यासीद्, वसुभूतिर्महीपतेः ॥५५५॥ कुन्तलाद् ज्ञातवृत्तान्तः, स दध्यौ हृदि हा ! कथम्। अपर्यालोचयन्तोऽर्थं, राजानः स्वोपघातकाः ? ॥ ५५६ ॥ ददता वसुधां तस्मै, तापसाय दुरात्मने। देशाद् देशप्रवासो हि स्वीकृतो भूभुजा स्वयम् ॥५५७॥ यदन्येनाऽदृष्टचरो, वराहं कोऽप्यवेदयत्। भूभुजे तद् ध्रुवं किञ्चिद्, ध्व्यमेतद् विजृम्भितम् ॥५५८॥ अविमृष्टायतिर्भूपः, क्षीयते न्यायवानपि। अत एव विमृष्टारः, सन्निधेयाः सुमन्त्रिणः ॥५५९॥ किं कुर्मो दुर्धियः कुर्युर्यत् किञ्चन



P. P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

महीभुजः। तत्तत्प्रतिक्रियाव्यग्रैः, क्लिश्यन्ते सचिवैः पुनः ॥५६०॥ विमृश्यैवं तदाऽमात्यः, सशल्य इव निःश्वसन्। विलासमण्डपेऽह्नाय, सचिन्तो नृपतिं ययौ ॥५६१॥ नत्वोपविष्टे तस्मिंश्च, मन्त्रिणि प्राह भूपतिः। वराहाऽऽवेदकस्याग्रे, प्रतिज्ञातमकृष्महि ॥५६२॥ मन्त्र्याह देव ! तत् सर्वं, वृत्तान्तं ज्ञातवानहम्। राज्ञोचे सस्मितं तर्हि, कुन्तलस्तद् न्यवेदयत् ॥५६३॥ मन्त्री प्राह विभो ! कस्य, प्रभुत्वं न मुदे भुवि। अनौचित्यमपि स्तौति, यत्रौचित्यमिवाऽनुगः ॥५६४॥ किन्तु विज्ञपयिष्यामि, कर्णयोः कटु किञ्चन। नाथाऽयं वसुधात्यागो, नहि मे प्रतिभासते ॥५६५ राज्ञोचे सत्यं किन्त्वेतद्, युक्तं नो युक्तमेव वा। प्रारम्भाद् युज्यते पूर्वं, निर्वाहोऽङ्गीकृते पुनः ॥५६६॥ किञ्च यान्तु श्रियो नाशं, प्रयातु निधनं कुलम्। प्रवासो वाऽस्तु निर्वाहः,प्रतिज्ञाते भवेद् यदि ॥५६७॥ अलं तदेतया पूर्वकृतमीमांसयाऽधुना। स्वर्णलक्षं हि ढौकस्व, स्वेनाऽऽयाति मुनिर्यतः ॥५६८॥ ततः सशिष्यः स मुनिः, कुर्वन्नागाद् नृपस्तुतिम्। अहो ! अगोचरे वाचां, राज्ञोऽस्य चरितं महत् ॥५६९॥ पुरोभूय नृपस्याऽसौ, सकोप इव मायया। अयाचत स्वशिष्येण, स्वर्णलक्षं महीपतिम् ॥५७०॥ नृपाऽऽदेशादथादिक्षत्, स मन्त्री कुन्तलं ततः। सोऽपि स्वर्णं समादाय, मुमोच नृपतेः पुरः ॥५७१॥ राज्ञोक्तः सचिवस्तस्मै, तापसाय ह्युपानयत्। सोऽपि वीक्ष्य किमेतद् भोः!?, पप्रच्छेति नृपं मुनिः ॥५७२॥ राज्ञोचे वञ्चनास्वर्णं, कुत एतन्मुनिर्जगौ?। अथाख्यद् नृपतिः कोशाद्, बहिरन्तः स वा क्षितेः? ॥५७३॥ इत्युक्ते मुनिना राजा, प्राह मध्ये क्षितेर्मुनिः। ब्रूते स्वामी क्षितेः कोऽत्र?, राजाऽऽख्यत् त्वं न चाऽपरः ॥५७४॥ मुनिरूचे ततः कोऽयं, प्रकर्षः कौशलस्य ते। यन्मदीयेन हेम्ना मेऽनृणीभवितुमिच्छसि ? ॥५७५॥ तदास्तां काञ्चनं यामो, दृष्टं सत्यं तवेयता। इत्युदित्वा मुनौ याति, राजा तस्य पुरोऽवदत् ॥५७६॥ विलम्बध्वं क्षणं यावदानयाम्यन्यदन्यतः। सकष्टमिव तस्थौ च, स मुनिर्भूभुजाऽर्थितः ॥५७७॥ ततो राजा मन्त्रिकर्णे, किमप्याचष्ट

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मन्त्र्यथ। केनचित् पुरुषेणाऽऽश्वऽजूहवद् वणिजोऽखिलान् ॥५७८॥ मुनिना दिव्यशक्त्या ते, हरिश्चन्द्रे द्विषः कृताः सम्भूय मन्त्रयामासुः, स्वामी नोऽतः परं मुनिः ॥५७९॥ हरिश्चन्द्रस्य दत्तेन, किं द्रव्येण वृथाऽधुना ? । यो हि स्वामी पुरस्याऽस्य, देयोऽस्माभिः करोऽस्य तत् ॥५८०॥ इति मन्त्रयतो मन्त्री, तानूचे रहसि स्थितः। राजा वोऽर्थयते स्वर्णमधमर्णो मुनेः स यत् ॥५८१॥ पश्यतस्तान् मिथो वक्तुं, स्वर्णदाने कृत्तोत्तरान्। हरिश्चन्द्रस्ततोऽभ्येत्य, स्वयमर्थयते स्म तान् ॥५८२॥ हे पौराः ! वोऽञ्जलिर्बद्धो, दत्त स्वर्णं कियन्मम। कुतश्चिदपि याचित्वा, दास्ये वः काञ्चनं पुनः ॥५८३॥ अल्पद्रव्या वयं दातुं, स्वर्णलक्षं न शक्नुमः। इत्यूचिवांसो वणिजो, राज्ञाऽऽदिष्टा ययुर्गृहान् ॥५८४॥ विलक्षोऽथ नृपो दध्यौ, किं करोमि ? कुतः पुनः। समानयामि तत् स्वर्णं ?, हा ! धिक् कीदृगुपस्थितम् ? ॥५८५॥ ततः कुलपतिः कोपकम्पमानाधरोऽवदत्। विलम्बः कोऽयमद्याऽपि, राजन् ! विसृज मां ततः ? ॥५८६॥ वसुभूतिर्मुनिं प्राह, विश्वदृश्वा त्वमस्यथ। हरिश्चन्द्रसमः क्वापि, दृष्टः किं कोऽपि सात्त्विकः ? ॥५८७॥ सोपहासमुवाचाऽथाऽङ्गारवक्त्रो न मन्त्र्यपि। दृष्टोऽभूत् त्वादृशो नाऽपि, हरिश्चन्द्रसमो नृपः ॥५८८॥ नृपं प्रति मुनिः प्रोचे, मायाविन् ! किं वृथोदितैः ? । हंसि मध्याह्नसन्ध्यां नः, सत्त्वं सत्यं च ते ह्यदः ? ॥५८९॥ ऊचेऽङ्गारमुखो राजन् !, वाञ्छसि त्वं किमात्मनः। कुलस्य यशसो लोकस्याऽऽकस्मिकमिह क्षयम् ? ॥५९०॥ प्रणम्योचे नृपो भीतेस्त्वत्तः किं स्यात् क्षयोऽपि नः ? । उपपूर्वाचलं नैव, ग्रहाणामस्तसम्भवः ॥५९१॥ निहन्ति पार्ष्णिना भूपं, मुनिस्तं नतवान् नृपः। कोपे क्षान्तौ च तावेव, तदाऽभूतां निदर्शने ॥५९२॥ सरोषमङ्गारमुखो, भूपं प्राह नृपाधम !। विप्लावयसि किं नस्त्वं, मृषाभाषामहोदधे ! ॥५९३॥ आहाऽङ्गारमुखं मन्त्री, विरोधस्ते मिथः कथम् ?। क्वेदृक् तपो रुषः क्वेमास्तन्मा ब्रह्म कलङ्कय ? ॥५९४॥ प्राहाऽङ्गारमुखः कोपादस्थापितमहत्तर !। कस्त्वमपि मम ब्रह्मचि-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न्तायां सचिवाधम ! ? ॥५९५॥ अरे ! राजंस्त्वमेनं किमन्तरालापिनं बटुम् । न निवारयसे किं मे, न प्रयच्छसि काञ्चनम् ? ॥५९६॥ राज्ञोचे त्वं मुने ! स्वैरं, ब्रूहि सर्वंसहोऽस्मि यत् । सूर्यवंश्या हि नैवेर्ष्यां, भजन्ते यतिषु क्वचित् ॥५९७॥ ऊचेऽङ्गारो यतिर्नाहं, किन्त्वेष ब्रह्मराक्षसः । ततो यद्यस्ति ते शक्तिस्तदा प्रहर सत्वरम् ॥५९८॥ नृपो दध्यौ स्वप्रतिज्ञाघातिना कलहेन किम् ? । तापसेन सहाऽनेन, क्रियते कृत्यमेव हि ॥५९९॥ कर्णे च कथिते भूपेनाऽऽनीयाभरणान्यपि । कुन्तलेनाऽर्पितान्येष, राज्ञोऽमूनीत्यपाकरोत् ॥६००॥ कुन्तलो वसुभूतिश्चाहतुः कुलपते ! नृपः । यावद् ददाति ते स्वर्णं, तावदावां गृहाण भोः ! ॥६०१॥ मुनिराह त्वया जूर्णमार्जारेण करोमि किम् ? । अल्पेन कुन्तलेनाऽपि, कः स्वर्णं स्वमुपेक्षते ? ॥६०२॥ आदिक्षत् कुन्तलं राजा, देवीभूषणमानय । स ययाचे ततो देवीं, देव्याहैष्याम्यहं स्वयम् ॥६०३॥ तेन दर्शितमार्गाऽसौ, रोहिताश्वेन संयुता । आययौ सदसि क्षिप्रं, सुतारा सावगुण्ठना ॥६०४॥ प्रणम्यैषा मुनिं प्रोचे, गृहाणाभरणं मम । मुनिराह पितुर्भर्तुर्वैतान्येषाऽब्रवीदिति ॥६०५॥ आर्यपुत्रेण मे योग्यं, नेपथ्यमिदमर्पितम् । मुनिराह ततः केयं, दक्षता ते पतिव्रते ! ? ॥६०६॥ ऊचेऽङ्गारमुखः किं न, जानासि त्वमियं किल । महाकूटनिवासस्य, हरिश्चन्द्रस्य गेहिनी ! ॥६०७॥ त्वदीयमेवाऽर्प्यते, वस्तु, येत्युदितेऽमुना । आबद्धभ्रकुटीभङ्गः, कुन्तलोऽथ रुषाऽवदत् ॥६०८॥ अरे ! तापस ! नो वेत्सि, देवीमेतां महासतीम् । तदेष त्वं न भवसीत्युक्त्वा सोऽप्यवदद् नृपम् ॥६०९॥ विमृशाऽद्यापि मा मुह्यः, किं यतेः स्यात् परिग्रहः । वाचश्चेमाः स्युरेते हि, मुनिव्याजेन राक्षसाः ? ॥६१०॥ ततः कुलपतिः क्रोधादूचे कर्मकराधम ! । आसादितपरज्ञानानधिक्षिपसि तापसान् ? ॥६११॥ यदि मेऽस्ति तपःसत्यं, तदा त्वमधुना द्रुतम् । श्मशानवासी गोमायुर्भवेत्युक्त्वा शशाप तम् ॥६१२॥ कुन्तलो जबुम्को भूत्वा, शब्दं कुर्वन् ययौ क्वचित् । प्रसीद मा कुपः स्वामिन् !, मुनिमित्यानमद् नृपः ॥६१३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पादेनाहत्य परतः, क्षिपति क्ष्मापतिं मुनौ। रोहिताश्वो रुदन्नाह, मा स्म हन् पितरं मम ॥६१४॥ किन्तु मां हि गृहाण त्वमिति श्रुत्वा शिशोर्वचः। मुनिः साश्रुदृशीभूय, प्रोचेऽङ्गारमुखं मृदु ॥६१५॥ बाष्परुद्धगलो नाऽस्मि, शक्तोऽहं दातुमुत्तरम्। ऊचेऽङ्गारमुखो मैवं, मुञ्च स्वमधुनैव हि ॥६१६॥ क्रूरीभूय मुनिः प्राह, सुतारां शिक्षितस्त्वया। बालोऽयं साऽऽह कृत्येषु, नाऽयं शिक्षामपेक्षते ॥६१७॥ यतः—वृद्धोपास्तिं विनाऽपि स्याद्, दक्षः स्फूर्तिमयः पुमान्। मणिः किं गारुडेऽधीती, यदसौ हरते विषम्? ॥६१८॥ राजाऽथ सास्रं दध्यौ च, यत् सजीवमजीवकम्। चेद् दत्तं प्राग् भुवा सार्धं, ततः स्वर्णं ददे कुतः? ॥६१९॥ विलम्ब्य काञ्चनं कृत्वा, कथञ्चिद् दातुमुत्सहे। इत्याह दैन्यात् स मुनिं, मासमेकं सहस्व मे ॥६२०॥ मुनिरूचे कथं पश्चाद्, भिक्षयित्वा प्रदास्यसि?। राजाहैक्ष्वाकवो भिक्षां, दातुं दक्षा न याचितुम् ॥६२१॥ कुतस्तर्हीति तेनोक्ते, राजोचे मुनिपुङ्गव!। विक्रीय स्वमपीत्येतद्, मुनिः श्रुत्वा विसिष्मिये ॥६२२॥ वाचा तु कठिनः प्राह, पृथ्वीं मुञ्च ममाऽधुना। राज्ञोचे कुत्र याम्याह, स न यत्रोपलक्ष्यसे? ॥६२३॥ राज्ञोक्तं मे भुवं मुञ्च, त्वमितीदं कियद् वचः?। हन्त! पूरयितुं सन्धां, त्यजन्तीक्ष्वाकवो ह्यसून् ॥६२४॥ ततोऽपवार्य ते प्रोचुस्तापसा मुदिता मिथः। अहो! सत्त्वमहो! सत्यमहो! सात्त्विकसूश्च भूः ॥६२५॥ देव्याह किमिदं मन्त्रिन्नरिष्टं नः समापतत्?। सोऽप्याह किमिदं वेद्मि, दैवं पृच्छ नृपप्रिये! ॥६२६॥ विमृश्याह नृपो देवीं, गच्छान्तःपुरमात्मनः। सुताराऽऽह समेष्यामि, युष्माभिः सार्धमप्यहो! ॥६२७॥ सास्रं प्राह नृपो देवि!, सुकुमारः शिशुः सुतः। पन्थानो विषमास्तत् त्वं, तिष्ठाऽत्रैव व्रजाम्यहम् ॥६२८॥ सावष्टम्भं सुताराऽऽह, यद् भाव्यं तद् भवत्विह। आगमिष्याम्यहं सार्धं, त्वया च्छायेव निश्चितम् ॥५२९॥ पतिव्रते! क्व चलिताऽसीयुक्ते मुनिनाऽऽह सा। प्रवासे सह नाथेन, येन पत्यनुगाः स्त्रियः ॥६३०॥ ममायत्तां हरिश्चन्द्रो, नेष्यते त्विदमद्भुतम्। इत्युक्ते मुनिना प्राह, वसुभूतिः

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

क्रुधा ज्वलन् ॥६३१॥ अरे ! तापस ! नासि त्वं, विज्ञो लोकस्थितेः खलु । विद्धीदानीं स्त्रियो भर्तृदेवता न परात्मिकाः ॥६३२।
यत् प्राह व्यवहारज्ञस्त्वन्मन्त्री तत्र ते मतम् । इत्युक्ते तापसेनाह, राजाऽपि मुनिपुङ्गवम् ॥६३३॥ मम स्त्रैणस्य पौंस्नस्य, देश-कोशा-
ऽश्व-हस्तिनाम् । किमन्यद् देव्याः पुत्रस्य, त्वमेव स्वाम्यतः परम् ॥६३४॥ तत् त्वं चेन्मन्यसे देवी, तदायातु मया सह । देव्याह
विसृज त्वं मां, मुने ! स प्राह याहि तत् ॥६३५॥ किन्तु मुक्त्वाऽऽभरणानि, यातेति मुनिनोदिते । मुमोच नृपतिः सर्वं, नेपथ्यं
मुकुटादिकम् ॥६३६॥ सुताराऽऽह पुनः किञ्चिदस्त्ववैधव्यलक्षणम् । भूषणं भगवन्नेवं, निशम्य मुनिरब्रवीत् ॥६३७॥ तव भद्रे !
हरिश्चन्द्र एवाऽवैधव्यलक्षणम् । इति वाचि मुनौ सास्रा, सुताराऽप्यभवत् ततः ॥६३८॥ मन्त्री प्राह मुनिं कोपादरेरे ! ब्रह्मराक्षस !।
नृपो विज्ञो ददत् ते क्ष्मां, किं वा गृह्णन्नितो भवान् ? ॥६३९॥ क्रुधा प्रोचे मुनिर्नाऽयं, कृत्येषु विदुरो नृपः । न चाऽहमपि विज्ञोऽस्मि,
विज्ञस्त्वं योऽन्तरायकृत् ॥६४०॥ मुनिः क्रुधाऽक्षिपद् भूमौ, गृहीत्वाऽम्भः कमण्डलोः । आह चास्ति तपश्चेन्मे, तदा त्वं द्राक् शुको
भव ॥६४१॥ ततश्च सचिवः कीरो, भूत्वाऽगाद् नभसा क्वचित् । राजा तु सभयं नत्वाऽवोचदेष गतोऽस्म्यहम् ॥६४२॥ निवार्य
रुदतो भूपः, पूर्लोकानन्वयप्रियान् । क्षमयित्वा स्वापराधान्, प्रतस्थे सप्रियासुतः ॥६४३॥ अनुरागाल्लुठद्बाष्पमनुयान्तं पुरीजनम् ।
कष्टान्निवर्तयामास, राजा स्नेहगिरा मृदुः ॥६४४॥ प्रचलन् सात्त्विकः पुत्र-कलत्राभ्यां समन्वितः । कथं कथमपि प्रान्तमध्वनः प्राप
भूपतिः ॥६४५॥ दूरमार्गपरिश्रान्ता, सुतारा नृपमब्रवीत् । कियद्द्यापि गन्तव्यं, खिन्नान्यङ्गानि नाथ ! मे ? ॥५४६॥ उवाच
नृपतिर्देवि !, मा ताम्यः किं न पश्यसि । अभ्रंलिहगृहाकीर्णामाराद् वाराणसीं पुरीम् ? ॥६४७॥ अतीव यदि खिन्नाऽसि, वहन्ती
पुत्रमात्मना । अनुगङ्गातटं रूढं, तदा चम्पकमाश्रय ॥६४८॥ देव्या तथाकृते राजा, स्वेनैव समवाहयत् । यथासुखं तदङ्गानि, ततो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कथाचतुष्टयी

सत्त्वोपरि-हरिश्चन्द्र-नृपकथा।

देवी व्यचिन्तयत् ॥६४९॥ यदा हि सम्पदः पुंसां, तदा सर्वोऽनुगच्छति । इदानीमार्यपुत्रं यन्न कोऽप्यागादनुव्रजन् ॥६५०॥ स्तुत्यः स्तौतीहते काम्योऽनुगम्योऽप्यनुगच्छति । नरं यस्यां प्रसन्नायां, को हि नेच्छति तां श्रियम् ? ॥६५१॥ स्वप्नदृश्या ततोऽभूद् नः, सा सम्पद् यां विनाऽधुना । पद्भ्यां यानं क्षितौ शय्या, कदाहारो मनःक्लमः ॥६५२॥ इत्यूचाना पिधायाऽऽस्यं, रुरोदोच्चैर्नृपप्रिया । रोहिताश्वस्ततोऽरोदीद्, भूत्वा साश्रुर्नृपोऽवदत् ॥६५३॥ मा रोदीर्भव धीरा त्वं, सात्त्विकत्वमुरीकुरु । मा मा शोकपिशाचोऽस्मान्, गृह्णातु परितो भ्रमन् ॥६५४॥ रोहिताश्वस्ततोऽवोचदहं तात ! बुभुक्षितः । राजाऽऽदिक्षदरे ! क्षिप्रं, देहि वत्साय मोदकम् ॥६५५॥ न कोऽपि यावदायाति, विलक्षो नृपतिस्ततः । किमेतदिति देव्योक्तः, पूर्वाभ्यासोऽब्रवीदिति ? ॥६५६॥ रोहिताश्वः पुनः प्राह, हे मातः ! क्षुधितोऽस्म्यहम् । रुदती तारतारं सा, सुतारा सुतमब्रवीत् ॥६५७॥ चक्रवर्तित्वप्रतिभूलक्षणोपेतवर्ष्मणः । भरतान्वयजातस्याऽवस्था केयं तवागता ? ॥६५८॥ अथ दध्यौ नृपः कीदृग्, राज्यस्यैतादृशः फलम् । रुदतो यत् तनूजस्य, प्रातराशेऽप्यशक्तता ? ॥६५९॥ आस्तां विनोदयाम्येनं, कौतुकप्रेक्षणादिभिः । पश्येतः पुत्र ! गङ्गायां, मिथः क्रीडन्ति पक्षिणः ॥६६०॥ हंसोऽयं सारसोऽयं च, कोकद्वन्द्वमिदं पुरः । कलापं पूरयित्वा च, नृत्यत्येष शिखी कथम् ? ॥६६१॥ तन्नामोच्चारपूर्वं तु, वीक्षमाणः सविस्मयम् । रोहिताश्वः पुनः प्राह, ताताऽहं क्षुधितो भृशम् ॥६६२॥ सवैलक्ष्यं पुनर्भूपे, बोधयत्येवमेव तम् । आगादकस्मात् क्वाप्येका, वृद्धा पाथेयमस्तका ॥६६३॥ पृच्छन्ती नगरीमार्गं, भूपं साऽऽहेदमद्भुतम् । चक्रिणो लक्षणान्यङ्गेऽवस्था च कथमीदृशी ? ॥६६४॥ कथा नः श्रूयमाणाऽपि, कातराणां भयावहा । तन्मा पृच्छ पुरो गच्छ, राज्ञेत्युक्ते चचाल सा ॥६६५॥ मोदकं देहि मे मातर् !, सुतरामिति भाषिणि । रोहिताश्वे ततो वृद्धा, निवृत्य तमढौकयत् ॥६६६॥ स्वयं निर्लम्पटत्वेन, सात्त्विकस्य सुतत्वतः । बुभुक्षितोऽपि



॥१९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

बालोऽपि, रोहिताश्वोऽग्रहीन्न तम् ॥६६७॥ नानुकम्पाप्रदानं ते, गृह्णीमो वयमध्वगे ! । प्रत्याख्यातेति राज्ञा सा, ययौ क्वापि क्षणादपि ॥६६८॥ देवि ! चेद् गतखेदाऽसि, तदोत्तिष्ठ पुरीं प्रति । याम इत्थं नृपेणोक्ते, सुताराऽऽह सगद्गदम् ॥६६९॥ निजराज्यपरिभ्रंशलज्जासज्जमनाः कथम् । प्रवेक्ष्यत्यार्यपुत्रोऽत्र, वैरीपुर्यां स्थितद्विषि ? ॥६७०॥ सावष्टम्भं नृपः प्राह, का लज्जा सत्त्वशालिनाम् ? । पूर्णीकर्तुं निजां सन्धामापदो यदि तन्महः ॥६७१॥ सुताराऽऽह भवेद् दैवात्, सा काऽप्यापदतर्किता । यत्र स्वस्य पराभूतिर्वैरिवर्गस्य तूत्सवः ॥६७२॥ राजा प्रोवाच देवि ! त्वं, न विचार्य प्रभाषसे । लक्ष्म्या बलेन वा हीनो, यदि स्यां तत् पराभवः ॥६७३॥ इदं पुराकृतं कर्म, प्रभवत् केन वार्यते ? । तत्प्रभावाद् दशाऽस्माकं, यद्येषा तद् द्विषां किमु ? ॥६७४॥ ततः प्रति पुरीं राजा, प्रतस्थे प्रियया सह । तामाह स्यात् कुतः स्वर्णं, यदासन्नोऽवधिर्मुनेः ? ॥६७५॥ मां विक्रीयाऽऽर्यपुत्राऽस्मै, तद् यच्छेति तयोदिते । राज्ञोक्तं विक्रयश्चेत् तत्, सर्वेषां नहि कस्यचित् ॥६७६॥ रोहिताश्वोऽब्रवीत् सास्रं, मा विक्रेष्टाऽस्तु मां पिता । मातर्वारय तातं मां, विक्रीणानं पुरे धनैः ॥६७७॥ सुतारा रोदिति क्ष्मापो, बाष्पं रुद्ध्वाऽऽह वत्स ! कः । विक्रेष्यते त्वां सोऽप्याह, तात ! विक्रेष्यते भवान् ॥६७८॥ त्वदन्तिकेऽम्ब ! स्थास्यामि, यास्याम्यन्यगृहे न तु । वरं मे मोदकं मा दा, इत्यूचानो रुरोद सः ॥६७९॥ राज्ञोचे देवि ! नैवाहं, पुत्रस्य करुणं वचः । श्रोतुं शक्नोमि तदिमं, कथञ्चिदपि वारय ॥६८०॥ रुदत्याह सुतारा त्वं, चक्रवर्ती भविष्यसि । मा रोदीस्तिष्ठ वत्स ! त्वां, विक्रेष्यति न कश्चन ॥६८१॥ रोहिताश्वस्य वाचाऽथ, मनोमर्माविधा रुदन् । पुरीभृतकवीथ्यां स, तस्थौ श्रेण्यां नृपस्ततः ॥६८२॥ किञ्चिद् विमृश्य च क्षिप्रं, तृणान्यानीय भूपतिः । न्यसन् मूर्ध्नि सुतारोक्तः, प्राहैषा भृतकस्थितिः ॥६८३॥ रोहिताश्वं धुनानं स्वं, शिरः प्राह ततो नृपः । विधेहि मद्वचो वत्स !, तुभ्यं दास्यामि हस्तिनम्

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥६८४॥ दध्यौ सुतारा धिग् दैवं, भवे भवशतानि यः । दत्ते यन्नः क्व सा लक्ष्मीः, क्वैषा विक्रयवाच्यता ? ॥६८५॥ राजाऽप्यचिन्तयद् दत्ता, न तथाऽकीर्तये मही। यथा ह्यकीर्तये पत्नी-पुत्रयोरिह विक्रयः॥६८६॥ विसृजामि सुतारां तत्, सपुत्रा पितृवेश्मनि। यद् भाव्यं तदहं सोढा, ध्यात्वेत्यूचे च तां नृपः ॥६८७॥ देवि! याहि पितृकुलं, पुत्रमादाय सम्प्रति। यथा तथाऽप्यहं स्वर्णं, दास्यामि मुनये खलु ॥६८८॥ साक्षेपं प्राह देवी तु, किन्नु स्यात् प्रलयेऽप्यदः ? । विमुच्य त्वामहं यान्ती, सत्यं जाताऽस्मि दुर्जया ॥६८९॥ सरसीव पयःपूर्णे, सर्वमृद्धौ समं भवेत् । नैःस्व्ये स्व-परयोर्भेदः शुष्केऽस्मिन्नुच्च-नीचवत् ॥६९०॥ किञ्च—वरं मृत्युर्वरं भिक्षा, वरं सेवाऽपि वैरिणाम् । दैवाद् विपदि यातायां, स्वजनाऽभिगमो न तु॥६९१॥ अपि च – सा सती या ह्रिया भर्तुः, सम्मुखे दिवसेऽनुगा । तनुच्छायेव धैर्येण, प्रतीपेऽस्मिन् पुरो भवेत् ॥६९२॥ इतश्च ब्राह्मणः कोऽपि, वीक्षमाण इतस्ततः । भृतिकां काञ्चिदायासीदुपभूपं स उन्मुखः ॥६९३॥ दृष्ट्वा च भूपमापादमस्तकं चक्रिलक्षणम् । ऊचे कस्त्वं कथं देहं, श्रीगेहं भृतकीयसि ? ॥६९४॥ शुचाऽऽत्तमौनं भूपालमालप्याऽगच्छदग्रतः । दृष्ट्वा सुतारां सास्रोऽभूदुच्चैर्दैवं निनिन्द च ॥६९५॥ रतेरपि शिरोरत्नमेतां निर्माय सुन्दरीम् । कथं नयसि रे ! दैव !, हन्त ! दास्यविडम्बनम् ॥६९६॥ यतः—स्निग्धमङ्गं सतीरूपं, सुवर्णं साधुभाषितम्। धत्ते किमपि लावण्यमसंस्कृतमपीतरत् ॥६९७॥ सुतारायाः पुरः पुण्यं, रोहिताश्वं सुलक्षणम् । दर्भाङ्कुशिरसं प्रेक्ष्य,धिक् शास्त्रमिति सोऽब्रवीत् ॥६९८॥ शास्त्रेषु लक्षणानीह, कथ्यन्ते यानि कानिचित् । सन्ति सर्वाणि तान्येषामवस्था पुनरीदृशी ॥६९९॥ नृपः स्वानुभवं ग्राह, मा मैवं त्वं द्विज ! ब्रवीः । शास्त्रं नहि मृषाभाषि, किन्तु मे कर्मवैभयम् ॥७००॥ पूर्वे जन्मनि यश्चक्रे, ददतामदतां स्वयम् । श्रेयश्च कुर्वतामन्तरायः स इह भुज्यते ॥७०१॥ तद्वशादीदृशी चेत् तेऽवस्थैषा तच्छुचाऽत्र किम् ? । सर्वं विषहमाणो हि, कर्मभिर्मु-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

च्यते जनः ॥७०२॥ किमस्या मूल्यमित्युक्ते, ब्राह्मणेन मुहुर्मुहुः । कथञ्चिद् रुद्धबाष्पोऽथ, राजाऽऽख्यदुचितं हि यत् ॥७०३॥ ततः स्वर्णसहस्राणि, पञ्चाऽस्या मूल्यमस्तु भोः ! । वदतीति द्विजे राजा, लज्जयाऽधोमुखोऽभवत् ॥७०४॥ अनिषिद्धमनुज्ञातमिति विप्रे नृपाञ्चले । स्वर्णं बध्नति राजाऽऽख्यद्, मोक्षोऽस्या द्विगुणेन भोः ! ॥७०५॥ तत् प्रपद्य द्विजः प्राह, सुतारामग्रतो भव । चलितायां सुतारायां, रोहिताश्वोऽञ्चलेऽलगत् ॥७०६॥ रुदतीदं सुताराऽऽह, तिष्ठ त्वं पितुरन्तिके । आनेतुं मोदकं तुभ्यं, वत्स ! यान्त्यस्मि सम्प्रति ॥७०७॥ अमुञ्चत्यञ्चले तस्मिन्, मुहुर्मात्राऽपि बोधिते । भृतिके ! किं विलम्बोऽयमिति क्रुद्धो द्विजोऽवदत् ? ॥७०८॥ सुतारां सभयं यान्तीं, यावद् मुञ्चति नार्भकः । तावत् करतलेनैतमाहत्याऽपातयद् द्विजः ॥७०९॥ सबाष्पं पुनरुत्थाय, मातुर्वस्त्राञ्चलेऽलगत् । पुनर्द्विजेन भूमौ स, पादेनाऽऽहत्य पातितः ॥७१०॥ राजा सास्रं ततो दध्यौ, धिगापदमिमां मम । इन्द्रस्याऽप्यङ्कलाल्योऽयं, पदा विप्रेण हन्यते ॥७११॥ ततः प्रोचे नृपो विप्र !, न तिष्ठेद् मातरं विना । शिशुः किमपि ते कर्म, कर्ता क्रीणीह्यमुं ततः ॥७१२॥ नैतं मुधाऽपि गृह्णामीत्यूचानं द्विजमब्रवीत् । सुताराऽऽर्य ! गृहाणैनं, विधाय मय्यनुग्रहम् ॥७१३॥ विप्रोऽपि कृपया स्वर्णसहस्रं तस्य वेतने । कृत्वा दत्त्वा च राज्ञे तावादाय स्वगृहं ययौ ॥७१४॥ राजा दध्यौ न लप्स्येऽहं, पुरे वासं ततो मुनिः । यद्येति स्वर्णमेतस्मै, दत्त्वा स्यामकुतोभयः ॥७१५॥ ततः कुलपतिः कुर्वन्नाज्ञामिव समाययौ । कोपात् पराङ्मुखीभूय, प्रोचे द्राग् देहि हेम मे ॥७१६॥ गृहाण कियदप्येतदित्युक्ते भूभुजा मुनिः । उवाच कुपितस्त्वैतद्, ग्रहीष्येऽल्पं न काञ्चनम् ॥७१७॥ मासोपरि गताः पञ्च, दिना यदि तदाऽपि हि । क्रियदेव ब्रुवाणस्त्वमदृश्यास्य ! न लज्जसे ॥ ७१८ ॥ दध्यौ राजाऽधमर्णं धिगुत्तमर्णस्य दुर्गिरः । यः सहन्नपि भूयोऽपि, तं प्रीणयति चाटुभिः ॥७१९॥ ऊचे च भगवन्नैव, काऽपि मे चित्तदुष्टता । विक्रीय दयिता-पुत्रौ, यत् प्राप्तं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत् समर्पये ॥७२०॥ ऊचेऽङ्गारमुखो मूर्ख !, राजानं प्रार्थय द्रुतम्। चन्द्रशेखरमत्रत्यं, किं विक्रीतौ प्रिया-सुतौ ? ॥७२१॥ राजाऽऽख्यत् किमिदं ब्रूषेऽनुचितं सत्त्वशालिनाम्। शतशो हि पराभूतान्नाहं प्रत्यर्थिनोऽर्थये ॥७२२॥ प्रतिज्ञया भ्रष्ट ! वाचाट !, पुरो नः स्वं विकत्थसे। इत्युक्ते मुनिना प्राह, राजा मा स्म मुने ! कुपः ॥७२३॥ चण्डालस्याऽपि कर्माऽहं, कृत्वा दुष्करमप्यथ। दास्ये स्वर्णमिति क्ष्मापोक्तेऽभूद् रोमाञ्चितो मुनिः ॥७२४॥ ततः कौपीनवासोभृल्लघुपिङ्गकचोच्चयः। दृढयष्टिकरो वृद्धो, निषादः कोऽपि चाऽगमत् ॥७२५॥ राजानं वीक्ष्य स प्रोचे, रे ! त्वं कर्मकरोऽसि किम् ?। करिष्यसि च मे कर्म ?, तत् श्रुत्वाऽचिन्तयद् नृपः ॥७२६॥ रविरस्तङ्गतो लोकः, क्रायको नास्ति नो मुनिः। क्षमते तन्निषादस्याऽपि कुर्वे कर्म सम्प्रति ॥७२७॥ करिष्ये कर्म तेऽवश्यं, राज्ञेत्युक्तेऽथ सोऽवदत्। किं किं कर्ताऽसि मे कर्म ?, राजाऽऽहाऽऽदिशसीह यत् ॥७२८॥ रक्षितव्यं श्मशानं च, लातव्यं मृतकाम्बरम्। अर्धदग्धानि काष्ठानि, ग्राह्याणि च चितिचयात् ॥७२९॥ यत् तत्रोत्पद्यते तस्यार्धं हि गृह्णाति भूपतिः। अन्यस्यार्धस्य भागौ द्वौ, ममैकस्ते तु दास्यते ॥७३०॥ राजाऽऽदिशति यत् किञ्चित्, तच्च कार्यं त्वया सदा। गङ्गासन्नश्मशानेशः, कालदण्डाभिधोऽस्म्यहम् ॥७३१॥ इति श्रुत्वा नृपः स्माह, तं त्वदाज्ञाकृदस्म्यहम्। यदत्र मां प्रति स्यात् तद्, दातव्यं मुनये खलु ॥७३२॥ अपवार्य मुनिः प्रोचे, नमस्ते सत्त्वशालिने। नमस्ते सत्यसन्धाय नमस्ते धैर्यसद्मने ॥७३३॥ कालदण्डोऽपि तद्वाचं, प्रपन्नः साक्षिणं मुनिम्। कृत्वा सह नृपेणासौ, श्मशानमगमद् निजम् ॥७३४॥ इतश्च पुर्यामेतस्यामकस्मादपि देहिनाम्। जीवितव्यं हरन् मृत्युरुपतस्थे खलो यथा ॥७३५॥ ततश्च परितः प्रोद्यदाक्रन्दध्वनिभिर्जितः। निलीयाऽस्थादिव क्वापि, नगरे मङ्गलध्वनिः ॥७३६॥ मृत्योर्भीता जना रक्षां, विदधत्यात्मनो यथा। तथा प्रेरितवन्मृत्यु-

१ भागिन्यर्थे द्वितीया।



॥२१॥

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

स्तान् गृह्णाति सहस्रशः ॥७३७॥ श्रुत्वाऽथ दुःसहलोकाऽऽक्रन्दं मरणजं पुरे। आहूत् सत्यवसुं भूपो, मन्त्रिणं चन्द्रशेखरः ॥७३८॥ राजादेशात् समायान्तं, मन्त्रिणं कोऽपि पूरुषः। अन्तरा मिलितोऽनंसीत्, कीरपञ्जरपाणिकः ॥७३९॥ कलहंस ! त्वया कीरो, लब्धोऽयं क्वेति मन्त्रिणा। पृष्टे स प्राह चम्पाया वने देवैनमाप्नुवम् ? ॥७४०॥ चन्द्रशेखरभूपाय, सदाप्रियविपश्चिते। सर्वशास्त्रनदीष्णत्वादिहाऽऽनैषं शुकोत्तमम् ॥७४१॥ इति तद्वचनं शृण्वंस्तेनैव सह मन्त्रिराट्। ययावुपनृपं नत्वा, यथास्थानमुपाविशत् ॥७४२॥ सखेदं प्राह भूपालो, मन्त्रिन् ! पश्य पुरीजनः। सङ्कोचितायुर्दैवेन, याति वातेन दीपवत् ॥७४३॥ न वयं दुर्नया नाऽपि, श्लथधर्मः पुरीजनः। नृणामकालमृत्युश्च, तदन्वेषय कारणम् ॥७४४॥ ततश्च कुट्टिनी काचित्, पुत्रीमरणविह्वला। उरस्ताडं समागत्य, साक्षेपं नृपमब्रवीत् ॥७४५॥ सदैवाऽन्यायकारी त्वं, सदा पीडयसि प्रजाः। सदाऽपि पापनिष्ठोऽसि, तेनाऽयं म्रियते जनः ॥७४६॥ मत्पुत्री नामतोऽनङ्गसुन्दरी स्मरमञ्जरी। प्रक्रीड्य सुखशय्यायां, सुप्ताऽकस्माद् मृताऽस्ति हा ! ॥७४७॥ अहो ! कर्कशता ह्यस्या, अहो ! निर्लज्जता गिराम्। इति ध्यायन्नृपेणोक्ते, मन्त्री किं क्रियतामिति ? ॥७४८॥ मन्त्र्याह स्वामिन्नत्रार्थे, प्रगल्भन्ते हि मान्त्रिकाः। राजा प्राहाऽऽगतोऽस्तीहोज्जयिन्या मान्त्रिको महान् ॥७४९॥ तत आकार्यतामेष, इत्युक्तो मन्त्रिणा नृपः। आजूहवत् तदैवैनं, सोऽप्यागत्य समाविशत् ॥७५०॥ राजोचे मान्त्रिकं किं नः, पुर्यां मारिविजृम्भितम् ? । सोऽप्याह नाटयन् ध्यानं, राक्षसीललितं ह्यदः ॥७५१॥ वृद्धवेश्याऽऽह साऽऽश्वासं, पुत्रिका मम मान्त्रिक ! । मृताधुनैव स प्राह, जीवयिष्यामि तां खलु ॥७५२॥ सा वस्त्राञ्चलमादाय, भ्रमयित्वा शिरस्यधात्। मदाशिषः प्रभावेन, चिरं त्वं जीव मान्त्रिक ! ॥७५३॥ ततो दासी समागत्य कुट्टिन्यै समचीकथत्। मातस्त्वं वर्धसे दिष्ट्या, यतो जीवति मे स्वसा ॥७५४॥ ततः प्रत्ययतो राजा, सादरं प्राह मान्त्रिकम्।

P. P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आनेतुं प्रभवस्येनां, राक्षसीमथ सोऽब्रवीत् ॥७५५॥ किमेवं कथ्यते देव !, मन्त्रेणाऽऽकृष्य वासुकिम् । पातालाद् वासवं स्वर्गाद्, अब्धेर्लङ्कामिहानये ॥७५६॥ यद्यस्ति कौतुकं तत् त्वं, सामग्रीमुपढौकय । माष-सर्षप-लवणान्युत्खड्गानष्ट पूरुषान् ॥७५७॥ क्षणात् तथाकृते राज्ञा, मान्त्रिको मण्डलं व्यधात् । तदन्तरुपविश्याथ, किञ्चिद् ध्यानमनाटयत् ॥७५८॥ दिक्पालाह्वानमर्चानां, मन्त्रानुच्चैरथोच्चरन् । मान्त्रिको राक्षसीं मन्त्रैराचकर्ष विहायसा ॥७५९॥ आयान्ती साऽनुगान् प्राह, रे ! ग्रासः क्वचिदीक्ष्यताम् । येनाऽस्मि सुचिराद् बाढं, क्षामकुक्षिर्बुभुक्षया ॥७६०॥ मण्डले मन्त्रशक्त्याथ, सनिर्घातं पपात सा । सर्वेप्यबिभयुस्तस्या, बिडाल्या इव मूषिकाः ॥७६१॥ सविस्मयं नृपः प्राह, मन्त्रोत्कर्षावधिस्त्वयम् । य एनां राक्षसीं मन्त्रैरानैषीत्, पश्यतां हि नः ॥७६२॥ मान्त्रिकः प्राह कर्त्तव्यमस्माभिः कृतमेव हि । उचितं यत् कुरु त्वं तन्निग्रहे त्वमसि प्रभुः ॥७६३॥ साक्षेपमादिशद् राजा, मन्त्रिन् ! श्वपचमाह्वय । कलहंसं तमाह्वातुमादिक्षत् सचिवस्ततः ॥७६४॥ कलहंसोऽपि तत्रैव, विमुच्य शुकपञ्जरम् । जगामाऽथ नृपोऽवादीद्, मन्त्रिन् ! किं न्वस्ति पञ्जरे ? ॥७६५॥ मन्त्रिणोचे महाराज !, शुकराजोऽस्ति सर्ववित् । उपश्लोकय राजानमित्युक्तश्च शुकोऽपठत् ॥७६६॥ सद्धर्म ! जय काशीन्द्र !, यस्याऽऽकृष्टा गुणैर्भृशम् । नयन्ति मार्गणा लक्ष्मीमेकेऽन्ये त्वानयन्ति ताम् ॥७६७॥ राज्ञा किं पठितोऽसीति, पृष्टोऽसावाख्यदात्मनः । तर्क-लक्षण-साहित्य-गणित-स्मृतिकौशलम् ॥७६८॥ मान्त्रिकः प्राह भो राजन् !, राक्षसी वोऽन्यचेतसाम् । प्रभविष्यति तत् कोऽयं, विलम्बोऽस्या विनिग्रहे ? ॥७६९॥ ततश्चागात् स चण्डालो, हरिश्चन्द्रसमन्वितः । हरिश्चन्द्रः शुको दृष्ट्वाऽभूदुत्फुल्लाक्षमानसः ॥७७०॥ प्राह च स्वस्ति ते नाथ !, भरतान्वयभूपते ! । हरिश्चन्द्र ! नमद्भूपमौलिरत्नाङ्कितक्रम ! ॥७७१॥ सरोषं प्राह राजाऽपि, किमबद्धं प्रभाषसे ? । क्व साकेतपतिर्ह्यत्र, कीर ! त्वं विह्वलोऽसि किम् ? ॥७७२॥ अथाह श्वपचं





P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मन्त्री, कुर्वंऽनाच्छादनामिमाम् ।तेनाऽपि हरिरादिष्टस्तां कृत्वाऽनवगुण्ठनाम् ।।७७३।। प्रत्यभ्यज्ञासीत् किं नाम, सुतारा देव्यसौ हहा !? । किमेतेन हि दैवेन, हन्तव्या वयमेव हा !? ।।७७४।। नास्मिन् कर्मणि देव्येषा, करणं स्यात् कथञ्चन । किन्तु मे कोऽपि दुष्कर्मप्रेरितः कुरुते ह्यदः ।।७७५।। प्रविश्याऽग्निं ततो देव्या, दोषमुत्सारयाम्यहम् । अथवाऽरिसभार्यां मे, नात्मा योग्यः प्रकाशितुम् ।।७७६।। मुनिभ्यः पृथिवी दत्ता, विक्रीता ससुता प्रिया । यत् करिष्यति दैवं तद्, हरिश्चन्द्रः सहिष्यते ।।७७७।। दृष्ट्वा तां बाह्यनेपथ्यैरदूषितवपुर्लताम् । मन्त्रिणे पृथिवीनाथः, स्ववितर्कं न्यवेदयत् ।।७७८।। चन्द्रकान्तं मुखं यस्याः, सुवर्णं वपुरेव हि । पद्मरागौ करावेव, किमस्या मण्डनान्तरैः ? ।।७७९।। उपलक्ष्य शुकोऽथैनां, ननाम नतमस्तकः । उशीनरसुते ! देवि !, सुतारे ! स्वस्ति ते सति ! ।।७८०।। राज्ञोचे किं मुहुः कीर !, प्रलपस्येवमुच्चकैः । क्व साऽत्रोशीनरसुता, किं त्वं कीरोऽसि मद्यपः ? ।।७८१।। सावष्टम्भं शुकः प्राह, हरिश्चन्द्रनृपो ह्ययम् । अस्य पत्नीयमित्यर्थोऽन्यथा स्यात् प्रलयेऽपि न ।।७८२।। राज्ञा पृष्टो हरिर्बूते, हरिश्चन्द्रो नृपोऽस्मि न । किन्त्वहं श्वपचस्याऽस्य, द्रव्यक्रीतोऽस्मि कर्मकृत् ।।७८३।। राज्ञा पृष्टाऽङ्गना प्राह, न सुताराऽस्मि राज्यहम् । किन्तु द्विजन्मनो वज्रहृदयाख्यस्य दासिका ।।७८४।। अरे ! विप्लावयस्यस्मानित्युक्ते भूभुजा शुकः । प्राह किं स्वं हरिश्चन्द्रः, प्रकाशयति ते पुरः ? ।।७८५।। यतः—सतो वाऽप्यसतो वाऽपि, स्वान् स्वयं कीर्तयन् गुणान् । ब्रह्मापि हास्यतां याति, किं पुनः प्राकृतो जनः ? ।।७८६।। हरिं प्रत्याह राजा भोः !, मा भैषीः सत्यमुच्यताम् । ननु यद्यप्यहं वैरी, त्राताऽऽपदि तथाऽपि ते ।।७८७।। हरिश्चन्द्रोऽब्रवीद् देव !, वचसा पक्षिणोऽस्य किम् । पुनरायस्यते स्वं यद्, दासोऽस्याऽस्मीत्यवोचत ? ।।७८८।। रूप-लावण्य-धैर्यादिगुणविस्मितचेतसा । राज्ञा पृष्टा पुनर्नारी, तदेवोत्तरमाख्यत ।।७८९।। मन्त्री प्राहाऽऽकृतावस्यां, राक्षसी कर्म किं भवेत् ? । ततो विचार्य कर्तव्यं, स्वामिना यद्यथो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चितम् ॥७९०॥ पृष्टश्च श्वपचो राज्ञा, प्राहाऽयं मम कर्मकृत्। इति निश्चित्य राजामुं, रासभानयनेऽब्रवीत् ॥७९१॥ तेनाऽप्युक्तो हरिश्चन्द्रस्तत्र रासभमानयत्। शक्तोऽपीष्टोऽपि किं कुर्यान्नरः परवशः खलु ? ॥७९२॥ विचार्य कार्यमाचर्यमिति मन्त्रि-शुकादिभिः। वार्यमाणोऽपि तां राजा, खरमारोपयद् द्रुतम् ॥७९३॥ अहो ! अक्षत्रमक्षत्रमित्याक्रन्दन् शुकोऽब्रवीत्। राजन् ! विज्ञापनामेकां, शृणु नीत्यनुयायिनीम् ॥७९४॥ राज्ञोचे ब्रूहि रे ! स्वैरं, कीरः प्रोवाच यद्यसौ। सुतारा राक्षसी स्यात् तद्, विशाम्यग्निं पुरस्तव ॥७९५॥ सदैन्यं प्राह सर्वोऽपि, सभालोकः शुकस्य गीः। अस्तु प्रमाणमामेति, राज्ञाऽप्यूचेऽनुरोधतः ॥७९६॥ सोत्साहं प्राह कीरोऽपि, मन्त्रिन् ! कारय तच्चिताम्। तथा तेन कृते कीरः, स्नात्वाऽगच्छच्चितां प्रति ॥७९७॥ ततो दिग्नायकानाह, यद्येषा राक्षसान्वया। भवेद् नृपसुता तन्मां, प्रदहत्वाशु हव्यवाट् ॥७९८॥ इत्युक्त्वा पश्यतामेव, तेषां गतभयः शुकः। झम्पामदाच्च विध्यातोऽग्निश्चास्थादक्षतः शुकः ॥७९९॥ आश्चर्यमिदमाश्चर्यमित्यूचाना जनाः स्फुटम्। सतीयं राक्षसी न स्यादित्यदुः शुद्धितालिकाम् ॥८००॥ मन्त्र्यूचे नाथ ! मन्येऽहं, मान्त्रिकस्य विजृम्भितम्। तत् केनाऽप्यपदेशेन, मान्त्रिकोऽयं विसृज्यताम् ॥८०१॥ तथेमां रासभादाशु, समुत्तारय सम्प्रति। इत्युक्तो मन्त्रिणा भूपः, सविस्मयमदोऽवदत् ॥८०२॥ किं कुर्मः ! किमु जानीमः ?, कस्येदं कैतवं महत् ?। सन्दिग्धेऽर्थे किलैतस्मिन् विचारं कुर्महे च किम् ? ॥८०३॥ इति विकल्प-कोपाभ्यां, संश्लिष्टो नृपतिः स्वयम्। व्यसृजद् मान्त्रिकं कीरं, पञ्जरेऽथ न्यधापयत् ॥८०४॥ उदतारयदेनां च, रासभाद् वनितां ततः। इति सर्वं विसृज्याऽथ, नृपः पल्यङ्कमासदत् ॥८०५॥ हरिश्चन्द्रोऽपि सूर्यास्ते, चाण्डालस्य नियोगतः। व्रजन् श्मशानं दध्यौ भोः !, कीदृग् दुर्दैवनाटकम् ? ॥८०६॥ देव्याः कर्मकरीत्वेन, स्थिताया विप्रसद्मनि। राक्षसीवचनं कीरो, दैवदत्तं न्यवर्तयत् ॥८०७॥ दैवमेव ततो मन्ये, बलवन्नापरः पुनः। यत् तेन विहिता ह्यापत्, तेनैव



P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

हि निवर्त्यते ॥८०८॥ तमस्यसूचीभेद्येऽपि, प्रविशन्निर्भयो हरिः। ददर्श भीषणाकारं, श्मशानं निशि सर्वतः ॥८०९॥ क्वचित् फेरण्डफेत्कारं, क्वचिद् राक्षसडम्बरम्। क्वचिद् बिभीषिकोद्द्योतं, क्वचित् कौशिकवासितम् ॥८१०॥ क्वचित् प्रेतपरित्रस्तशवसंस्कारकृत् जनम्। क्वचिच्च डाकिनीमुच्यमानोत्किलकिलावरम् ॥८११॥ क्वचित् कापालिकैर्गृह्यमाणसत्पुण्यमस्तकम्। सर्वतोऽपि च दुर्गन्धपूरपूरितनासिकम् ॥८१२॥ उपर्युपरि पर्यस्तमुण्डतुण्डस्खलद्गमम्। इतस्ततः श्मशानं स, पश्यन् शुश्राव दुर्ध्वनिम् ॥८१३॥ अहो! आर्तध्वनिः सैषा, मृतपत्याः स्त्रियाः खलु। रुदतीं वारयाम्येनामित्यगात् तत्पुरो नृपः ॥८१४॥ उवाच च शुभे! किं ते, कारणं परिदेवने ?। साऽऽह पश्याऽग्रतो गत्वा, न्यग्रोधे कारणं मम ॥८१५॥ हरिर्गत्वा ततोऽपश्यत्, पुमांसं पूर्णलक्षणम्। ऊर्ध्वपादमधोवक्त्रं, वटशाखानियन्त्रितम् ॥८१६॥ सोढाऽहं पुरुषः कान्ते!, त्वं पुनर्भाविनी कथम् ?। तत्प्रलापमिति श्रुत्वा, दध्यौ राजाऽस्य सा प्रिया ॥८१७॥ अस्योपकारं कुर्वे यद्, दत्ता भूर्मुनये मया। मुनिकन्याधनोपाये, विक्रीतौ दयिता-सुतौ ॥८१८॥ जीवितस्याऽस्य निर्विण्णः, स्वयमेव पुराऽस्म्यहम्। कृत्वा परार्थं चेद् यामि, तत् किं नाप्तं फलं मया ? ॥८१९॥ इति ध्यात्वा हरिः प्रोचे, तमुद्बद्धं नरं मृदु। अहो! कस्त्वं कथं चेयमवस्था ते सुदुःसहा ? ॥८२०॥ जानन्नस्मीति यद् वक्तुमुद्बद्धेन न शक्यते। परं त्वदाकृतिः पुण्या, प्रयुङ्क्ते प्रष्टुमत्र माम् ॥८२१॥ तदाख्याहि न शक्तोऽस्मि, द्रष्टुं ते दुस्सहां दशाम्। इति तत् प्रणयं दृष्ट्वा, प्रोवाचोद्बद्धपूरुषः ॥८२२॥ नाहमेतां दशां दीनां, कस्याऽपि हि निवेदये। तच्छ्रोता वेत्ति किं मत्तो, यत् परित्राणमीहते ? ॥८२३॥ परन्त्वन्यभवस्नेहानुबन्धादथवोत्तमात्। उपकारपरत्वात् ते[1], पृच्छते कथयामि भोः! ॥८२४॥ महासेनोऽस्मि काशीन्द्रचन्द्रशेखरनन्दनः। विद्या-

१ चतुर्थ्यन्तम्।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धर्याऽत्र पल्यङ्कादानीतः प्रियया युतः ॥८२५॥ किमर्थमिति तेनोक्ते, नरः प्राहाऽत्र सम्प्रति। मन्मांसेन महाहोमं, सा करिष्यति खेचरी ॥८२६॥ क्व गता साऽधुना विद्याधरीति हरिणोदिते । स्नातुं गङ्गां नदीं व्योम्ना, जगामेत्यवदद् नरः ॥८२७॥ ततो दध्यौ नृपो हर्षाद्, गत्वरैश्चेन्ममाङ्गकैः । विद्याधर्या भवेत् सिद्धिर्जीवितं चाऽस्य चारु तत् ॥८२८॥ तमुवाच हरिश्चन्द्रः, प्रार्थये त्वां किमप्यहो! । स प्राहैवंविधावस्थं, किं त्वं प्रार्थयसेऽत्र माम् ? ॥८२९॥ राज्ञोचे यदलं दातुं, प्रार्थ्यसे त्वं तदेव हि । स प्राह तर्हि याचस्व, यदभीष्टं नरोत्तम! ॥८३०॥ हरिः प्राह प्रयाहि त्वं, स्वं राज्यं स्वीकुरु क्षणात्। यत् कार्यं तत् करिष्यामि, विद्याधर्याः स्ववर्ष्मणा ॥८३१॥ पुरुषः प्राह किं ब्रूते, नाऽऽत्मनीयमिदं खलु । अधमः कः स्वयं स्वार्थे, परप्राणान् व्ययिष्यते ? ॥८३२॥ किञ्च स्वं मे यथाभिष्टं, यथा मे मृत्युभीरुता । यथैषा दयिता मेऽस्ति, तवाऽप्येवं तथाऽस्ति भोः ! ॥८३३॥ तद् याहि त्वमतः स्थानादधुनैष्यति खेचरी । तेनेत्युक्ते हरिश्चन्द्रः, सदैन्यमिव तं जगौ ॥८३४॥ मा मा मे प्रार्थनां व्यर्थां, कुरुष्व पुरुषोत्तम!। स्वेनाप्यहं महाकष्टान्मर्तुकामोऽस्मि तद् यदि ॥८३५॥ त्वादृशस्योपकृत्याऽथ, म्रिये स्यां सफलस्तदा । उपकारपरोधर्मः, इत्याख्यान्ति बहुश्रुताः ॥८३६॥ न जातौ न जनिष्येते द्वाविमौ पुरुषौ भुवि । अर्थितो यः करोत्येव, यश्च नाऽर्थयते परम् ॥७३७॥ इत्येवं बहुशोऽभ्यर्थ्य, स्वयमुन्मोच्य बन्धनात् । याहीति प्रेषितस्तेन, स जगाम प्रियायुतः ॥८३८॥ नूपुरक्वाण-कल्पद्रुपुष्पस्रक्सौरभादिभिः । ज्ञात्वा विद्याधरीं आरादायान्तीं नृपतिः क्षणात् ॥८३९॥ बद्ध्वा न्यग्रोधशाखायां, स आत्मानमधोमुखम् । गतमृत्युभयं तस्थौ, रोमाञ्चकवचाञ्चितः ॥८४०॥ ततो विद्याधरी व्योम्नोऽवततारााऽऽर्द्रचीवरा । अग्निकुण्डत्रये वह्निमुज्ज्वलं समचिस्करत् ॥८४१॥ सज्जीकृत्य च पूजादि, विद्याधर्याह पार्श्वगान् । चित्राङ्गद ! समीक्षस्व, किं लक्षणधरो नरः ॥८४२॥ चित्राङ्गदोऽप्युपागत्य हरिश्चन्द्राङ्गलक्षणम् । वीक्ष्योचे देवि ! मोदस्व,




॥२४॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

येनाऽयं चक्रिलक्षणः ॥८४३॥ हुत्वा कुण्डत्रये मांसमस्य प्रान्ताहुतीकृते । शीर्षे विश्ववशीकारविद्याऽऽविर्भविता स्वयम् ॥८४४॥ इत्यूचाना मुदोत्थायाऽऽनर्च सर्वाङ्गमप्यमुम् । ऊचे च स्मर किञ्चित् त्वं, देवं यत्राऽसि भक्तिमान् ॥८४५॥ भवेश्च सात्त्विको येन, विद्या सिध्यति मेऽधुना । यत् त्वन्मांसैर्हुतैः सा स्यात्, प्रीता च वरदा च मे ॥८४६॥ हरिश्चन्द्रस्ततोऽवादीद्, ध्वस्तसंसारवैशसम् । स्मरामि निष्ठितक्लेशं, देवं नाभिसमुद्भवम् ॥८४७॥ इदानीं मा विलम्बस्व, होमः स्याद् बहुविघ्नभूः । स्वेनैवोत्कृत्य मांसं स्वं, यच्छाम्येष गृहाण तत् ॥८४८॥ सा प्राह सिद्धिर्मन्त्रस्य, जातैवं त्वं यदुत्तमः । मत्तोऽप्युत्साहवानीदृक्, समवायो हि पुण्यतः ॥८४९॥ ततः प्रवृत्ता कुण्डेषु, ज्वलज्ज्वालाऽऽकुलेषु सा । हरिश्चन्द्रार्पितं मांसं, प्रक्षेप्तुं मन्त्रपूर्वकम् ॥८५०॥ ऊचे च परितः खड्गहस्तान् विद्याधरोत्तमान् । मा दत्ताऽत्र प्रवेशं भोः!, श्वापदस्य नरस्य वा ॥८५१॥ कियत्यपि कृते होमेऽभूदाविर्देवतामुखम् । मध्यकुण्डात् ततो जातौ, सोत्साहौ तावुभौ मुदा ॥८५२॥ अथ गोमायुरटितं, कुण्डानि परितोऽभवत् । विषादार्त्ता ततो विद्याधर्यूचेऽयं निवर्त्यताम् ॥८५३॥ यद्यस्य घोरफेत्कारैर्निद्रां त्यक्ष्यति तापसः । होमध्वंसं तदागत्य, स करिष्यति निश्चितम् ॥८५४॥ सर्वैः स नाश्यमानोऽपि, प्रत्युताऽऽगात् समीपगः । जजागार ततश्चाऽऽरादाश्रमे तापसः क्षणात् ॥८५५॥ किञ्चित् किञ्चित् ततो विद्यामुखं नीचैर्ममज्ज च । खेचर्युवाचाऽपर्याप्तहोमा हा ! हा ! हतास्म्यहम् ॥८५६॥ सावष्टम्भं हरिः प्राह, मा विषीद गृहाण मे । छित्त्वा शिरोऽपि पर्यन्ताहुतिहोमं समापय ॥८५७॥ ऊचे विद्याधरी होमः, क्रमात् स्यान्ननु नाऽक्रमात् । क्रमं च क्षमते नैष, तापसः क्रोधमावहन् ॥८५८॥ अरे! किमिदमारब्धमस्मदाश्रमभूमिषु । इत्याक्रोशन् विवेशोच्चैरुद्धतस्तत्र तापसः ॥८५९॥ ममज्ज तन्मुखं देव्या, मध्येकुण्डाग्नि सत्वरम् । भीता विद्याधरी साऽथ, क्वाऽप्यगात् सपरिच्छदा ॥८६०॥ ततः क्रोधात् परिभ्राम्यन्, तापसस्तत्र जग्मिवान् । यत्राऽऽस्ते कृत्तसर्वा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ङ्गः, शाखाबद्धो हरिः श्वसन् ॥८६१॥ क्षणेन तापसः किञ्चिदुपलक्ष्याऽऽह विस्मयात्। अरे! भवान् हरिश्चन्द्रः, सोऽप्याख्यदोमिति स्फुटम् ॥८६२॥ तमाह तापसः क्रुद्धः, स्वर्णं कुलपतेरदाः ? । नृपः प्राह दिनैः कैश्चित्, प्रभो ! पूर्णंभविष्यति ॥८६३॥ उपलक्षयसि त्वं मे, प्रोक्तस्तेन नृपोऽवदत् । कौटिल्यस्त्वं महीदाने, साक्षी कुलपतेरसि ॥८६४॥ अरे ! कुलपतेः स्वर्णमनापूर्येति किं त्वया । आरब्धमित्यूचानेऽस्मिन्, राड् ह्रियाऽधोमुखोऽभवत् ॥८६५॥ ततो मा भून्मुनेः स्वर्णहानिरस्मिन् मृते त्विति । औषध्या व्रणरोहिण्या, स्वेनालिम्पत् स तद्वपुः ॥८६६॥ अभूच्च तत्क्षणादेवाऽऽरूढव्रणवपुर्नृपः । ययौ च तापसः स्थाने, स्वे दध्यौ हरिरप्यथ ॥८६७॥ नाऽपूर्णं मेऽभवत् किञ्चित्, सर्वस्वं ददतो मुनेः। विद्याधर्या न यत् सिद्धिः, सञ्जाता तत् दुनोति माम् ॥८६८॥ अरे ! क्व त्वं गतोऽसीति, प्राऽऽहूतः श्वपचेन सः ? । उपसृत्याह कर्तव्यं, मम स्वामिन् ! समादिश ॥८६९॥ स प्राहैष मृतः कोऽपि, समायाति ततो भवान् । वस्त्रं गृह्णातु गत्वेति, प्रेरितोऽगाद् नृपस्ततः ॥८७०॥ अशृणोच्छब्दमेकस्याः, करुणार्त्तं सुतव्ययात् । हा पुत्र ! क्व गतोऽसीति, मूर्च्छन्त्याश्च मुहुः स्त्रियाः ॥८७१॥ अहो ! दैवेन निर्मुक्तकरुणेन किलाङ्गजम् । व्यापादयता निर्भाग्याऽभीष्टाऽपत्या त्वसौ हता ॥८७२॥ अहो! असारः संसारो, मर्त्यवाचामगोचरः । यदिष्टं देहिनां तत् तु, ग्राहत्ययेव यो यमात्॥८७३॥ कथं चाऽहं ग्रहीष्यामि बालस्योर्ध्वात् किलाम्बरम् ? । इति मन्दपदः प्रोक्तः, श्वपचेनाशु गच्छ रे !॥८७४॥ सभयं परिचक्राम, हरिश्चन्द्रः सुतं स्मरन् । न शुध्येद् यदि देवी मे, तदा वत्सो म्रियेत सः ॥८७५॥ ततः शुश्राव करुणं, रुदतीं वनितामिति। निर्भाग्यशेखराया मे, मृतो वत्सो हताऽस्मि हा ! ॥८७६॥ वत्सो मृत इमां वाचं, प्रतिघ्नन् मङ्गलोक्तिभिः । वामाक्षिस्पन्दनेनाऽथ, बभूवाऽऽशङ्किमानसः ॥८७७॥ सर्वस्वं मुनये दत्तं, विक्रीतौ दयिता-सुतौ । चाण्डालकर्मकर्ताऽहं, किं मे वा भाव्यतः परम् ? ॥८७८॥ इति चिन्तातुरो यावद्, मार्गे



॥२५॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

याति नृपस्ततः। चाण्डालपतिना प्रोक्तो, व्याघुटचेति व्यजिज्ञपत् ॥८७९॥ आगतोऽस्ति मृतो बाल, इति वस्त्राऽऽहृतौ त्रपा। स प्राह का त्रपाऽस्माकमाचारोऽयं गृहाण तत् ॥८८०॥ निवृत्याऽथ हरिर्दध्यौ, धिग् लोभं यद्वशाज्जनः। वेत्ति कृत्यमकृत्यं वा, नैव दैवहतो हहा! ॥८८१॥ यदाऽऽदिशति मे स्वामी, तत् कर्तव्यं मया खलु। विचारो युज्यते नैव, स्वाम्यादिष्टेऽनुजीविनाम् ॥८८२॥ स गच्छन्निति शुश्राव, स्त्रीविलापं तमुच्चकैः। हा! हा! पुत्र! त्वमेको मे, तन्मे मृत्युस्त्वया सह ॥८८३॥ त्वं ममैवाऽसि कुपितो, रे! दैव! यत् पतिर्मम। बभूव कर्मकृन्नीचगेहेऽहमपि तादृशी ॥८८४॥ परमस्य स्वपुत्रस्य, भरतान्वयशालिनः। आलम्बनेन जीवन्त्या, भविता काऽद्य मे गतिः? ॥८८५॥ हरिश्चन्द्रोऽपि विज्ञाय, सुतारां त्वरितो व्रजन्। मुञ्चन्नश्रूण्यथोऽवादीद्, निन्दन्नात्मानमात्मना ॥८८६॥ निर्भाग्यशेखरे! देवि!, वज्रघातः क एष नौ?। वनिता वीक्ष्य भर्तारं, तारं तारं रुरोद सा ॥८८७॥ हरिश्चन्द्रोऽप्यरोदीच्च, धैर्यं कस्य सुतव्यये?। रोहिताश्वं हरिर्मोहादाश्लिष्यत् किल पूर्ववत् ॥८८८॥ सुतारां प्राह देवि! त्वं, किं रोदिषि तथा कथम्। वत्सो मां भाषते नैव?, भवत्या रोषितः किमु? ॥८८९॥ किं त्वया मोदकं नास्मै, दत्तः किं परिधापितः?। नाऽद्य रत्नाङ्कितं हारं, किं हस्ती नाऽर्पितो मया? ॥८९०॥ क्षमस्व वत्सलो हि त्वं, स्वेच्छया यत् तु रोचते। इति स्वं सान्त्वयन् पुत्रं, देव्याऽसौ परिदेवितः ॥८९१॥ किं न पश्यसि मूढ! त्वं, गतासुं तनयं निजम्। गतसुश्च कथं पश्येदाश्लिष्येन्निगदेदथ? ॥८९२॥ किमारब्धं त्वया सार्धं, नार्या किं नैषि सत्वरम्?। इत्युक्तः श्वपचेनाऽसौ, भयाच्चैतन्यमासदत् ॥८९३॥ अज्ञासीच्च मृतं पुत्रं, चेष्टयाथाश्रुलोचनः। सुतारां पुत्रवृत्तान्तमप्राक्षीत् साऽप्यचीकथत् ॥८९४॥ अद्याऽयं प्रातरेवाऽगाः, समित्-पुष्पकृते वने। विप्रेण प्रेषितो मन्दभाग्यो दष्टोऽहिना प्रिय! ॥८९५॥ विनाऽऽत्मीयान्न

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कोऽप्यस्य, विषस्योत्तारणं व्यधात् । विना बन्धुं जगच्छून्यं, जीवो धर्मं विना यथा ॥८९६॥ हरिश्चन्द्रस्ततो दध्यौ, धिग् मां व्यसनपातिनम् । एकत्र श्वपचः क्रुद्धोऽन्यत्र पुत्रव्ययक्लमः ॥८९७॥ प्रवासोऽरिपुरीवासो, नीचदास्यं सुतव्ययम् । हरिश्चन्द्रोऽखिलं सोढा, देवी त्वेकसुता हता ॥८९८॥ किञ्च मे वेक्ष्यतो हस्तौ, पुत्रवस्त्राहृतौ कथम् ? । स्वाम्यादेशमकर्तुं च, नैवौजस्वि मनो मम ॥८९९॥ अथवा पुत्रमृत्यौ को, मे विचारो यदस्म्यहम् । श्वपचाधीनदेहस्तत्, स यद् ब्रूते करोमि तत् ॥९००॥ अन्यथा स्यां प्रतिज्ञातभ्रष्टः सत्त्वकलङ्कितः । सत्त्वैकतानवृत्तीनां, नाऽपत्याद्यनुरागिता ॥९०१॥ व्यापन्नस्य सुतस्याऽस्य, न गृह्णाम्यम्बरं यदि । निर्वाहयामि नो सन्धां, लज्जते तरणिस्तदा ॥९०२॥ इति सत्त्वानिलोद्धूताऽपत्यबन्धः स सात्त्विकः । भूत्वा पराङ्मुखोऽशक्तो, याचितुं स्फुटया गिरा ॥९०३॥ अर्पयाऽऽच्छादनमिति, संज्ञया प्रतिपादयन् । हस्तं प्रसारयामास, हरिश्चन्द्रः प्रियां प्रति ॥९०४॥ सुताराऽपि च तदभिप्रायं स्फुटमजानती । उच्चिक्षेप करे दातुं, रोहिताश्वं मुहुर्मुहुः ॥९०५॥ अगृह्णति हरिश्चन्द्रे, पुत्रं साऽऽह ब्रवीषि किम् ? । न जानामि तवैतां हि, संज्ञां ब्रूहि ततः स्फुटम् ॥९०६॥ धैर्यसन्दंशकाकृष्टवचनः सात्त्विकोऽवदत् । देवि ! तिष्ठतु वत्सोऽयं, वत्साऽऽच्छादनमर्पय ॥९०७॥ यावदेवं हरिश्चन्द्रो, वदत्यात्मप्रियां प्रति । तावत् तस्य शिरस्याशु पुष्पवृष्टिरभूद् दिवः ॥९०८॥ अहो ! सत्त्वमहो ! धैर्यं, हरिश्चन्द्रमहीपतेः । एवमुद्घोषणापूर्वं, दुन्दुभिध्वनिरत्यभूत् ॥९०९॥ राजाऽप्यपश्यदात्मानमयोध्यायां निजौकसि । अलङ्कृतमहासिंहासनं स्वसदसि स्थितम् ॥९१०॥ रोहिताश्वमपश्यच्च, क्रोडे क्रीडन्तमात्मनः । अश्रान्तकान्तिरत्नाङ्कहारस्फारश्रियं मुदा ॥९११॥ वसुभूतिं महामात्यं, कुन्तलाख्यं च सेवकम् । द्वावप्येतौ स्वस्वरूपौ, पुरोऽद्राक्षीत् कृताञ्जली ॥९१२॥ यवनिकान्तरे चैव, द्रष्टुं नाटकमागताम् । सुतारां भाषमाणां च, सख्या शुश्राव भूपतिः ॥९१३॥ पुरतश्च सुसङ्गीतरसनिर्मग्नचेत-



॥२६॥

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

साम् । नृपा-ऽमात्यप्रभृतीनामपश्यत् संसदं निजाम् ।।९१४।। प्रतिमन्दिरमैक्षिष्ट, क्रियमाणं च नागरैः । नृत्यत्पुरन्ध्रिविश्राण्यमानदा-नमहोत्सवम् ।।९१५।। प्रतीहारमुखप्राप्तान्, विजिज्ञपयिषून् जनान् । दूरतो नमतः प्रेक्ष्य, किमित्येतदचिन्तयत् ।।९१६।। किं नु स्वप्नो मया दृष्टः, किं वा मे मनसो भ्रमः । किं वा कस्याऽपि देवस्य, चित्रमेतद् विजृम्भितम् ।।९१७।। ततश्च प्रकटीभूय, चन्द्रचूड-मणिप्रभौ । पुरः स्थित्वा सुरौ राज्ञः, सहर्षमिदमूचतुः ।।९१८।। त्रिशङ्कुनन्दन ! श्रीमदिक्ष्वाकुकुलमण्डन ! । भरतान्वयभूपाल !, हरिश्चन्द्र ! चिरं जय ।।९१९।। धन्यः सुग्राह्यनामा त्वं, यस्य वास्तोष्पतिः स्वयम् । सत्त्वं स्तवीति मूर्धानं, धुनानो द्युसदां पुरः ।।९२०।। यादृशः कथितो राजन्नचाल्यो द्युसदामपि । शक्रेण तादृगेवाऽसि, सात्त्विकेषु शिरोमणिः ।।९२१।। माहात्म्येन तवैवेदं, पुना राज्यं तथैव हि । अढौकत निजस्फीत्या, निर्जिताऽमर-दानवम् ।।९२२।। वसुभूतिः स एवाऽयं, मन्त्री मित्रं च ते नृप ! । शुकरूपः प्रविश्याऽग्नौ, यो देव्याः शुद्धिमातनोत् ।।९२३।। कुन्तलश्चैष ते सेवां, करोति रचिताञ्जलिः । जम्बुकीभूय ते होमसङ्कटे यस्तदाऽरटत् ।।९२४।। शूकरोदन्तमारभ्य, यावदद्य नरेन्द्र ! यत् । अनुभूतं त्वया विद्धि, तदस्मत्कूटनाटकम् ।।९२५।। एतत् सर्वं भवत्सत्त्व-परीक्षारसिकैः खलु । अस्माभिर्विहितं तत् ते, क्षन्तव्यं महतां गुरो ! ।।९२६।। चित्रं परोपकाराय, मर्त्यत्वेऽपि भवादृशाम् । अवतारः परोत्पत्त्यै, स्वर्गेऽप्यस्मादृशां पुनः ।।९२७।। किं वा कोऽपि गुणोऽस्माकमपि ते सत्त्वदीपनात् । सुवर्णस्य कथं रेखा, कषपट्टं विना भवेत् ? ।।९२८।। तव सत्त्वेन सत्येन, हरिश्चन्द्र ! महानृप ! । जलदो वर्षति स्फीतशस्या भूर्मुदितो जनः ।।९२९।। स्वस्यैव सुकृते-नेदं, राज्यमापि पुनस्त्वया । अस्मत्तः परितुष्टेभ्यः, किञ्चिद् याचस्व साम्प्रतम् ।।९३०।। लज्जितस्त्रिदशोपज्ञवर्णनाकर्णनाद् नृपः । उवाच न कदाऽप्यस्मि, शिक्षितो याचितुं परम् ।।९३१।। किञ्च सत्त्वं न मुक्तं स्वं, सूर्यवंशो न लज्जितः । सत्यवाचः कृतश्चेन्द्रः, किमतः पर-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मर्थये ? ॥९३२॥ पुनरप्यूचतुर्देवौ, नृप! तन्वन् यशः सितम्। दिव्यशक्तिः श्रियां पात्रं, सदाऽऽनन्दमयो भव ॥९३३॥ प्रभावमिति तौ तत्र, न्यस्य स्वास्पदमीयतुः। इन्द्रोऽपि परमां प्रीतिमवाप ससुरासुरः ॥९३४॥ राजाऽथ श्रीहरिश्चन्द्रस्तत्प्रभृति विशेषतः। दयालुर्जगदानन्दस्त्यक्तव्यसनकौतुकः ॥९३५॥ शक्रावतारतीर्थस्य, सर्वज्ञस्य कृपानिधेः। श्रीवृषध्वजदेवस्य पर्युपास्तिपरायणः ॥९३६॥ दिव्यशक्तिप्रभावेण, गगनक्रीडनादिकाम्। महर्द्धिं दर्शयन् लोके, पालयामास काश्यपीम् ॥९३७॥ (त्रिभिर्विशेषकम्)

**अन्यत्रोद्धृतोपसंहारः—**

अन्येद्युर्बहिरुद्याने, गतः क्षोणिपतिः स्वयम्। तीर्थं शक्रावताराख्यं, जीर्णं शीर्णं व्यलोकयत् ॥१॥
वसुभूतिरुवाचाथ, ज्ञात्वा चेतो महीभुजः। इङ्गिताकारतत्त्वज्ञाः, मन्त्रिणः सर्ववेदिनः ॥२॥
वृषभस्वामिनो बिम्बं, भासुरं शक्रनिर्मितम्। इदं शक्रावताराख्यं, महातीर्थं महीतले ॥३॥
कालक्रमादिदं जीर्णं, बभूव क्षितिनायक!। उद्धारकारिणो यस्मात्, प्रभवन्ति भवादृशाः ॥४॥
भवानप्यादिमजिन-सन्ताने समजायत। कुरुष्वेदं नवं तीर्थं, देहिनं रसवेदिवत् ॥५॥
भरतेशा-ऽऽदित्ययशःप्रभृतीनां महीभुजाम्। स्वपूर्वजानामाख्याभिः, ख्याताः स प्रतिमा व्यधात् ॥६॥
अमारिपूर्वकं भूरिदानसम्प्रीणितार्थी च। प्रतिष्ठां कारयामास, चैत्योद्धारमकारयत् ॥७॥
सम्यक्त्वं निर्मलं बिभ्रद्, विदधानः प्रभावनाम्। कालक्रमेण शुद्धात्मा, देवभूयमगादयम् ॥८॥

**॥ इति सत्त्वोपरि सत्यवादिहरिश्चन्द्रनृपकथा ॥**

શ્રી મોહનલાલજી જૈન જ્ઞાન ભંડાર ગોપીપુરા, સુરત



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

## ॥ इति कथाचतुष्टयी समाप्ता ॥

શ્રી મોહનલાલજી
જૈન જ્ઞાન ભંડાર
ગોપીપુરા સુરત.

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust